## ॥ अथ तृतीयदशकप्रारंभः ॥

हरिः ॐ स्वाद्वीन्त्वा स्वादुना तीव्रान्तीव्रेणामृताममृतेन ॥ मधुमतीम्मधुम
ता सृजामि सꣳ सोमेन ॥ सोमोऽस्यश्विभ्याम्पच्यस्व सरस्वत्यै पच्यस्वेन्द्राय
सुत्राम्णे पच्यस्व ॥ १ ॥ परीतोषिञ्चता सुतꣳ सोमो य उत्तमꣳ हविः ॥ द
धन्वायो नर्यो अप्स्वन्तरा सुषाव सोमम्द्रिभिः ॥ २ ॥ वायोः पूतः पवित्रेण
प्राङ्क्सोमोअतिद्रुतः ॥ इन्द्रस्य युज्यस्सखा ॥ वायोः पूतः पवित्रेण प्रत्य
ङ्क्सोमो अतिद्रुतः॥ इन्द्रस्य युज्यस्सखा ॥ ३ ॥ पुनातिते परिस्रुतꣳ सोमꣳ सू
र्यस्य दुहिता ॥ वारेण शश्वता तना ॥ ४ ॥ ब्रह्म क्षत्रम्पवते तेज इन्द्रियꣳ
सुरया सोमस्सुत आसुतो मदाय ॥ शुक्रेण देव देवताः पिपृग्धि रसेनान्नँय्य
जमानाय धेहि ॥ कुविदङ्गयवमन्तोयवञ्चिद्यथा दान्त्यनु पूर्वंव्वियूय ॥ इहे
हैषाङ्कृणुहि भोजनानि येबर्हिषो नम उक्तिन्न जग्मुः ॥ उपयामगृहीतोऽस्य

श्विभ्यान्त्वा सरस्वत्यै त्वेन्द्रायत्वा सुत्राम्णे ॥ एषते योनिस्तेजसेत्वा वीर्याय
त्वाबलायत्वा ॥ ५ ॥ नानाहि वान्देवहितꣳ सदस्कृतम्मासꣳ स्र्क्षाथाम्परमे व्यो
मन् ॥ सुरा त्वमसि शुष्मिणी सोमएष मामा हिꣳसीस्स्वाँय्योनिमाविशन्ती
॥ ६ ॥ उपयामगृहीतोऽस्याश्विनन्तेजस्सारस्वतँव्वीर्यमैन्द्रम्बलम् ॥ एषते योनि
र्मोदायत्वा नन्दायत्वा महसेत्वा ॥ ७ ॥ तेजोऽसि तेजो मयि धेहि वीर्यमसि
वीर्यम्मयि धेहि बलमसि बलम्मयिधेह्योजोऽस्योजो मयि धेहि ॥ मन्युरसिम
न्युम्मयि धेहि सहोऽसि सहो मयि धेहि ॥ ८ ॥ या व्याघ्रँव्विषूचिकोभौ वृकं
ञ्च रक्षति ॥ श्येनम्पतत्रिणꣳ सिꣳहꣳ सेमम्पात्वꣳहसः ॥ ९ ॥ यदापिपेष
मातरम्पुत्रःप्रमुदितो धयन् ॥ एतत्तदग्ने अनृणो भवाम्यहतौ पितरौ मया ॥ १०॥
सम्पृचस्थसम्मा भद्रेण पृङ्क्त ॥ विपृचस्थविमा पापेन पृङ्क्त ॥ ११ ॥ १

देवा यज्ञमतन्वत भेषजम्भिषजाश्विना ॥ वाचा सरस्वती भिषगिन्द्रायेन्द्रिया
णिदधतः ॥१॥ दीक्षायै रूपꣳ शष्पाणि प्रायणी यस्यतोक्मानि ॥ क्रयस्य रूपꣳ
सोमस्य लाजास्सोमाꣳ शवो मधु ॥ २ ॥ आतिथ्यरूपम्मासरम्महावीरस्य नग्न
हुः ॥ रूपमुपसदामेतत्तिस्रो रात्रीस्सुरासुता ॥ ३ ॥ सोमस्य रूपङ्क्रीतस्य परि
स्रुत्परिषिच्यते ॥ अश्विभ्यान्दुग्धम्भेषजमिन्द्रायैन्द्रꣳ सरस्वत्या ॥ ४ ॥ आसन्दी
रूपꣳ राजा सन्द्यैवेद्यै कुम्भीसुराधानी ॥ अन्तरउत्तरवेद्या रूपङ्कारोतरोभिष
क् ॥ ५ ॥ वेद्या वेदिस्समाप्यते बर्हिषा बर्हिरिन्द्रियम् ॥ यूपेन यूप आप्यते प्र
णीतो अग्निरग्निना ॥ ६ ॥ हविर्धानँय्यदश्विनाग्नीध्रँय्यत्सरस्वती ॥ इन्द्रायैन्द्रꣳ
सदस्कृतम्पत्नी शालङ्गार्हपत्यः ॥ ७ ॥ प्रैषेभिः प्रैषानाप्नोत्याप्रीभिराप्रीर्यज्ञस्य ॥
प्रयाजेभिरनु याजान्वषट्कारेभिराहुतीः ॥ ८ ॥ पशुभिः पशूनाप्नोति पुरोळाशै

हवीꣳष्या ॥ छन्दोभिस्सामिधेनीर्याज्याभिर्वषट्कारान् ॥९॥ धानाः करम्भस्सक्त
वः परीवापः पयो दधि ॥ सोमस्य रूपꣳहविष आमिक्षा वाजिनम्मधु ॥ १० ॥
धानानाꣳ रूपङ्कुवलम्परी वापस्य गोधूमाः ॥ सक्तूनाꣳ रूपम्बदरमुपवाकाः कर
म्भस्य ॥ ११ ॥ पयसो रूपँय्यद्यवा दध्नो रूपङ्कर्कन्धूनि ॥ सोमस्य रूपँव्वा
जिनꣳ सौम्यस्य रूपमामिक्षा ॥ १२ ॥ आश्रावयेतिस्तोत्रियाः प्रत्याश्रावो अनु
रूपः ॥ यजेतिधाय्या रूपम्प्रगाथाये यजामहाः ॥ १३ ॥ अर्धऋचैरुक्थानाꣳ रूप
म्पदैराप्नोति निविदः ॥ प्रणवैश्शस्त्राणाꣳ रूपम्पयसा सोम आप्यते ॥ १४ ॥
अश्विभ्याम्प्रातस्सवनमिन्द्रेणैन्द्रम्माध्यन्दिनम् ॥ वैश्वदेवꣳ सरस्वत्या तृतीयमा
प्तꣳ सवनम् ॥ १५ ॥ ॥ वायव्यैर्वायव्यान्याप्नोति सतेन द्रोणकलशम् ॥ कु
म्भीभ्यामम्भृणौसुते स्थालीभिस्थालीराप्नोति ॥ १६ ॥ यजुर्भिराप्यन्ते ग्रहाग्रहै

स्तोमाश्च विष्टुतीः ॥ छन्दोभिरुक्था शस्त्राणिसाम्नावभृथआप्यते ॥ १७ ॥ इळा
भिर्भक्षानाप्नोति सूक्तवाकेनाशिषः ॥ शँय्युना पत्नी सँय्याजान्त्समिष्ट यजुषा
सꣳस्थाम् ॥ १८ ॥ व्रतेन दीक्षामाप्नोति दीक्षयाप्नोतिदक्षिणाम्॥दक्षिणाश्रद्धा
माप्नोति श्रद्धया सत्यमाप्यते ॥ १९ ॥ एतावद्रूपँय्यज्ञस्य यद्देवैर्ब्रह्मणाकृतम् ॥
तदेतत्सर्वमाप्नोति यज्ञेसौत्रामणीसुते ॥ २० ॥ २

सुरावन्तम्बर्हिषदꣳ सुवीरँय्यज्ञꣳ हिन्वन्ति महिषा नमोभिः ॥ दधानास्सो
मन्दिवि देवतासु मदेमेन्द्रँय्यजमानास्स्वर्काः ॥ १ ॥ यस्ते रसस्सम्भृत ओष
धीषु सोमस्य शुष्मस्सुरया सुतस्य ॥ तेन जिन्व यजमानम्मदेन सरस्वतीम
श्विना इन्द्रमग्निम् ॥ २ ॥ यमश्विना नमुचेरासुरादधि सरस्वत्यसुनोदिन्द्रियाय ॥
इमन्तꣳ शुक्रम्मधुमन्तमिन्दुꣳ सोमꣳ राजानमिह भक्षयामि ॥ ३ ॥ यदत्र

रिप्त॒ॅ रसिनंस्सुतस्ययदिन्द्रो अपिबच्छचीभिः ॥ अहन्तदस्य मनसा शिवेन
सोमॅ॒ राजानमिह भक्षयामि ॥ ४ ॥ पितृभ्यस्स्वधायिभ्यस्स्वधानमः पितामहे
भ्यस्स्वधायिभ्यस्स्वधानमः ॥ प्रपितामहेभ्यस्स्वधायिभ्यस्स्वधानमः ॥ ५ ॥
अक्षन्पितरोऽमीमदन्त पितरोऽतीतृपन्त पितरः ॥ पितरः शुन्धध्वम् ॥ ६ ॥ पुन
न्तुमा पितरस्सोम्यासः पुनन्तुमा पितामहाः पुनन्तु प्रपितामहाः ॥ पवित्रेण श
तायुषा ॥ ७ ॥ पुनन्तुमा पितामहाः पुनन्तु प्रपितामहाः ॥ पवित्रेण शता
युषा विश्वमायुर्व्यश्नवै ॥ ८ ॥ अग्न आयूँषि पवस आसुवोर्जमिषंश्चनः ॥
आरेबाधस्व दुच्छुनाम् ॥ ९ ॥ पुनन्तुमा देवजनाः पुनन्तु मनसाधियः ॥ पुन
न्तुविश्वा भूतानि जातवेदः पुनीहिमा ॥ १० ॥ पवित्रेण पुनीहिमा शुक्रेणदे
वदीद्यत् ॥ अग्ने क्रत्वा क्रतूँरनु ॥ ११ ॥ यत्ते पवित्रमर्चिष्यग्नेविततमन्तरा ॥

ब्रह्मतेन पुनातुमा ॥ १२ ॥ पवमानस्सो अद्यनः पवित्रेण विचर्षणिः ॥ यः
पोता सपुनातुमा ॥ १३ ॥ उभाभ्यान्देव सवितः पवित्रेण सवेनच ॥ माम्पु
नीहि विश्वतः ॥ १४ ॥ वैश्वदेवी पुनती देव्यागाद्यस्यामिमा बह्व्यस्तन्वो वी
तपृष्ठाः ॥ तया मदन्तस्सधमादेषु वयँस्याम पतयोरयीणाम् ॥ १५ ॥ येस
मानास्समनसः पितरो यमराज्ये ॥ तेषाँल्लोकस्स्वधानमो यज्ञो देवेषु कल्पताम् ॥
१६ ॥ ये समानास्समनसो जीवा जीवेषु मामकाः ॥ तेषाँ॒ श्रीर्मयि कल्पता
मस्मिँल्लोके शतँ॒ समाः ॥ १७ ॥ द्वेसृती अश्रृणवम्पितृणामहन्देवानामुतमर्त्या
नाम् ॥ ताभ्यामिदँविश्वमेजत्समेति यदन्तरा पितरम्मातरञ्च ॥ १८ ॥ इदँ॒
हविः प्रजननम्मे अस्तु दशवीरँ॒ सर्वगणँ॒ स्वस्तये ॥ आत्मसनि प्रजासनि प
शुसनि लोकसन्यं भयसनि ॥ अग्निःप्रजाम्बहुलाम्मे करोत्वन्नम्पयो रेतो अ

स्मासुंधत्त ॥ १९ ॥ ३

उदीरता मवर उत्परां स उन्मध्यमाः पितरंस्सोम्यासः ॥ असुँय्य ईयुरं वृका
ऋतज्ञास्तेनोऽवन्तु पितरो हवेषु ॥ १ ॥ त्वꣳसोम प्रचिकितो मनीषात्वꣳरजिष्ठ
मनुंनेषिपन्थाम् ॥ तवप्रणीती पितरों न इन्दोदेवेषु रत्नंमभजन्तधीराः ॥ २ ॥
त्वया हिनः पितरंस्सोम पूर्वे कर्माणि चक्रुःपवमान धीराः ॥ वन्वन्नवातः परिधी
ꣳरपोर्णु वीरेभिरश्वैर्मघवा भवानः ॥ ३ ॥ त्वꣳसोम पितृभिस्सँविदानोऽनुद्या
वांपृथिवी आततन्थ ॥ तस्मै तइन्दो हविषा विधेम वयꣳस्याम पतंयो रयीणा
म् ॥ ४ ॥ बर्हिषदःपितर ऊत्यर्वागिमा वोंहव्या चंकृमाजुषध्वम् ॥ त आगता वं
सा शन्तमेनाथा नश्शँय्योररपो दधात ॥ ५ ॥ उपहूताः पितरंस्सोम्यासों बर्हि
ष्येषु निधिषु प्रियेषु ॥ त आगमन्तुत इह श्रुवन्त्वधिब्रुवन्तुतेऽवन्त्वस्मान् ॥ ६ ॥

आहम्पितृन्त्सु विदत्राँ२अवित्सिन पातञ्च विक्रमणञ्च विष्णोः ॥ बर्हिषदो
ये स्वधया सुतस्य भजन्त पित्वस्त इहागमिष्ठाः ॥ ७ ॥ अग्निष्वात्ताःपितर
एहगच्छत सदस्सदस्सदत सुप्रणीतयः ॥ अत्ता हवीꣳषि प्रयतानि बर्हिष्य
था रयिꣳ सर्ववीरन्दधातन ॥ ८ ॥ आयन्तुनः पितरंस्सोम्यासोऽग्निष्वात्ताः प
थिभिर्देवयानैः ॥ अस्मिन्यज्ञे स्वधया मदन्तोऽधि ब्रुवन्तु तेऽवन्त्वस्मान् ॥ ९ ॥
येअग्निष्वात्ता येअनग्निष्वात्ता मध्ये दिवस्स्वधया मादयन्ते ॥ तेभ्यस्स्वराळसुनी
तिमेनाँय्यथा वशन्तन्वङ्कल्पयाति ॥ १० ॥ अग्निष्वात्ता नृतुमतो हवामहे नारा
शꣳसेसोम पीथँय्यआशुः ॥ तेनो विप्रासस्सुहवा भवन्तु वयꣳस्याम पतयोर
यीणाम् ॥ ११ ॥ आच्या जानु दक्षिणतो निषद्येमँय्यज्ञमभिगृणीत विश्वे ॥
माहिꣳसिष्ट पितरः केन चिन्नो यद्व आगः पुरुषता कराम ॥ १२ ॥ आसीना

सो अरुणीनां मुपस्थे रयिन्धत्त दाशुषे मर्त्याय ॥ पुत्रेभ्यः पितरस्तस्य वस्वः
प्रयच्छतत इहोर्जन्दधात ॥ १३ ॥ यमग्ने कव्यवाह नत्वञ्चिन्मन्यसेरयिम् ॥
तन्नो गीर्भिः श्रवाय्यन्देवत्रा पनया युजम् ॥ १४ ॥ यो अग्निः कव्यवाहनः
पितॄन्यक्ष दृता वृधः ॥ प्रेदुहव्यानि वोचति देवेभ्यश्च पितृभ्य आ ॥ १५ ॥
त्वमग्न ईळितो जातवेदो वाड्ढव्यानि सुरभीणि कृत्वी ॥ प्रादाःपितृभ्यस्स्वध
या ते अक्षन्नद्धि त्वन्देव प्रयता हवीꣳषि ॥ १६ ॥ इदम्पितृभ्यो नमो अस्त्व
द्ययेपूर्वासो य उपरासईयुः ॥ ये पार्थिवे रजस्या निषत्ताये वा नूनꣳ सुवृज
ना सुविक्षु ॥ ॥ १७ ॥ ये चेह पितरो ये चनेह याꣳश्च विद्मयाँ२उ चनप्र वि
द्म ॥ त्वँवेत्थ यतिते जातवेदस्स्वधाभिर्यज्ञꣳ सुकृतञ्जुषस्व ॥ १८ ॥ अधा
यथानः पितरः परासः प्रत्नासो अग्नऋतमाशुषाणाः ॥ शुचीदयन्दीधितिमु

क्थ शासःक्षामाभिन्दन्तो अरुणीरप व्रन् ॥ १९ ॥ उशन्तस्त्वा निधीम ह्युश
न्तस्समिधीमहि ॥ उशन्नु शत आवह पितॄन्हविषे अत्तवे ॥ २० ॥ अपाम्फे
नेन नमुचेश्शिर इन्द्रोदवर्तयः ॥ विश्वायदजयस्पृधः ॥ २१ ॥ ४

सोमो राजामृतꣳ सुतऋजीषेणाजहान्मृत्युम् ॥ ऋतेन सत्यमिन्द्रियँव्विपा
नꣳ शुक्रमन्धस इन्द्रस्येन्द्रियमिदम्पयोऽमृतम्मधु ॥ १ ॥ अद्भ्यःक्षीरँव्यपिब
त्कुङ्ङाङ्गिरसो धिया ॥ ऋतेन सत्यमिन्द्रियँ व्विपानꣳ शुक्रमन्ध स इन्द्र
स्येन्द्रियमिदम्पयोऽमृतम्मधु ॥ सोमम द्भ्यो व्यपिब च्छन्दसा
हꣳसःशुचिषत् ॥ ऋतेन सत्यमिन्द्रियँव्विपानꣳ शुक्रमन्धस इन्द्रस्येन्द्रि
यमिदम्पयोऽमृतम्मधु ॥ अन्नात्परि स्रुतो रसम्ब्रह्मणा व्यपिबत्क्षत्रम्पयस्सो
मम्प्रजापतिः ॥ ऋतेन सत्यमिन्द्रियँव्विपानꣳ शुक्रमन्धस इन्द्रस्येन्द्रियमिद

म्पयोऽमृतम्मधु ॥ २ ॥ रेतो मूत्रँव्विजहाति योनिम्प्रविशदिन्द्रियम् ॥ गर्भो
जरायुणा वृत उल्बञ्जहाति जन्मना ॥ ऋतेन सत्यमिन्द्रियँव्विपानꣳ शुक्रम
न्धस इन्द्रस्येन्द्रियमिदम्पयोऽमृतम्मधु ॥ ३ ॥ दृष्ट्वा रूपे व्याकरोत्सत्या नृ
ते प्रजापतिः ॥ अश्रद्धा मनृते दधाच्छ्रद्धाꣳ सत्ये प्रजापतिः ॥ ऋतेन सत्य
मिन्द्रियँव्विपानꣳ शुक्रमन्धस इन्द्रस्येन्द्रियमिदम्पयोऽमृतम्मधु ॥ ४ ॥ वेदे
न रूपे व्यपिबत्सुता सुतौ प्रजापतिः ॥ ऋतेन सत्यमिन्द्रियँव्विपानꣳ शुक्रमन्ध
स इन्द्रस्येन्द्रियमिदम्पयोऽमृतम्मधु ॥ दृष्ट्वा परिस्रुतो रसꣳ शुक्रेण शुक्रँव्व्य
पिबत्पयस्सोमम्प्रजापतिः ॥ ऋतेन सत्यमिन्द्रियँव्विपानꣳ शुक्रमन्धस इन्द्रस्ये
न्द्रियमिदम्पयोऽमृतम्मधु ॥ ५ ॥ ५

सीसेनतन्त्रम्मनसामनीषिणऊर्णासूत्रेणकवयोवयन्ति ॥ अश्विनायज्ञꣳसविता

सरस्वतीन्द्रस्यरूपँव्वरुणो भिषज्यन् ॥१॥ तदस्य रूपममृतꣳ शचीभिस्तिस्रोदधु
र्देवतास्सꣳ रराणाः ॥ लोमानि शष्पैर्बहुधानतोक्मभिस्त्व गस्य माꣳ सम्भव
न्नलाजाः ॥ २ ॥ तदश्विना भिषजारुद्रवर्तनी सरस्वती वयति पेशो अन्तरम् ॥
अस्थिमज्जा नम्मासरैः कारोतरेण दधतो गवान्त्वचि ॥ ३ ॥ सरस्वती मनसा
पेशलँव्वसुनासत्याभ्याँव्वयति दर्शतँव्वपुः ॥ रसम्परिस्रुता नरोहितन्नग्नहुधीर
स्तसरन्नवेम ॥ ४ ॥ पयसा शुक्रममृतञ्जनित्रꣳ सुरया मूत्राज्जनयन्त रेतः ॥
अपामतिन्दुर्मतिम्बाधमाना ऊवध्यँव्वातꣳ सब्वन्तदारात् ॥ ५ ॥ इन्द्रस्सुत्रा
माहृदयेन सत्यम्पुरोळाशेन सविता जजान ॥ यकृत्क्लोमानँव्वरुणोभिषज्यन्म
तस्ने वायव्यै र्नमिनाति पित्तम् ॥ ६ ॥ आन्त्राणि स्थालीर्मधु पिन्वमाना गु
दाःपात्राणि सुदुघान धेनुः ॥ श्येनस्य पत्रन्नप्लीहा शचीभिरासन्दीनाभिरुदरन्न

माता ॥ ७ ॥ कुम्भो वनिष्ठुर्जनिता शचीभिर्यस्मिन्नग्रे योन्याङ्गर्भो अन्तः ॥ प्ला
शिर्व्यक्तश्शतधार उत्सो दुहेन कुम्भी स्वधाम्पितृभ्यः ॥ ८ ॥ मुखꣳ सदस्यशिर
इत्सतेन जिह्वापवित्रमश्विना सन्त्सरस्वती ॥ चप्पन्न पायुर्भिषगस्य वालो व
स्तिर्न शेपो हरसा तरस्वी ॥ ९ ॥ अश्विभ्याञ्चक्षुरमृतङ्ग्रहाभ्याञ्छागेन तेजो
हविषा शृतेन ॥ पक्ष्माणि गोधूमैः कुवलैरुतानि पेशो न शुक्रमसितँवसा
ते ॥ १० ॥ अविर्न मेषो नसिवीर्याय प्राणस्य पन्था अमृतो ग्रहाभ्याम् ॥
सरस्वत्युपवाकैर्व्यानन्नस्यानि बर्हिर्बदरैर्जजान ॥ ११ ॥ इन्द्रस्य रूपमृषभो
बलाय कर्णाभ्याꣳ श्रोत्रममृतङ्ग्रहाभ्याम् ॥ यवा न बर्हिर्भ्रुवि केसराणि कर्क
न्धु जज्ञे मधु सारघम्मुखात् ॥ १२ ॥ आत्मन्नुपस्थे न वृकस्य लोम मुखे श्म
श्रूणि न व्याघ्रलोम ॥ केशा न शीर्षन्यशसे श्रियै शिखा सिꣳहस्य लोमत्वि

षिरिन्द्रियाणि ॥ १३ ॥ अङ्गान्यात्मन्भिषजा तदश्विनात्मानमङ्गैस्समधात्सर
स्वती ॥ इन्द्रस्यरूपꣳशतमानमायुश्चन्द्रेण ज्योतिरमृतन्दधानाः ॥ १४ ॥ सर
स्वती योन्याङ्गर्भमन्तरश्विभ्याम्पत्नी सुकृतम्बिभर्ति ॥ अपाꣳ रसेन वरुणो न
साम्नेन्द्रꣳ श्रियै जनयन्नप्सुराजा ॥ १५ ॥ तेजः पशूनाꣳ हविरिन्द्रियावत्परिस्रु
ता पयसा सारघम्मधु ॥ अश्विभ्यान्दुग्ध म्भिषजा सरस्वत्या सुता सुताभ्या
ममृतस्सोम इन्दुः ॥ १६ ॥ ६ ॥

क्षत्रस्य नाभिरसि क्षत्रस्य योनिरसि ॥ मात्वाहिꣳसीन्मामा हिꣳसीः ॥ निषं
साद धृतव्रतो वरुणः पस्त्यास्वा ॥ साम्राज्याय सुक्रतुः ॥ मृत्योःपाहि विद्योत्पा
हि ॥ देवस्यत्वा सवितुः प्रसवेऽश्विनो र्बाहुभ्याम्पूष्णो हस्ताभ्याम् ॥ १ ॥ अश्वि
नोर्भैषज्येन तेजसे ब्रह्मवर्चसा याभिषिञ्चामि सरस्वत्यै भैषज्येन वीर्याया न्ना

द्याया भिषिंञ्चामि ॥ इन्द्रस्येन्द्रियेण बलायश्रियै यशसेऽभिषिंञ्चमि ॥ २ ॥
कोऽसि कतमोऽसि कस्मै त्वा कायत्वा ॥ सुश्लोक सुमङ्गल सत्यराजन् ॥ ३ ॥
शिरोमे श्रीर्यशो मुखन्त्विषिः केशाश्चश्मश्रूणि ॥ राजा मे प्राणो अमृतꣳ सम्रा
ट्चक्षुर्विराट्श्रोत्रम् ॥ ४ ॥ जिह्वा मे भद्रँ व्वाङ्महोमनो मन्युस्स्वराड्भामः ॥
मोदाः प्रमोदा अङ्गुली रङ्गानि मित्रम्मे सहः ॥ ५ ॥ बाहूमे बलमिन्द्रियꣳ ह
स्तौ मे कर्म वीर्यम् ॥ आत्मा क्षत्रमुरो मम ॥ ६ ॥ पृष्टी मे राष्ट्रमुदरमꣳ सौ
ग्रीवाश्च श्रोणी ॥ ऊरू अरत्नी जानुनी विशोमेऽङ्गानिसर्वतः ॥ ७ ॥ नाभिर्मे
चित्तँव्विज्ञानम्पायुर्मेऽपचितिर्भसत् ॥ आनन्दनन्दा आण्डौमे भगस्सौभाग्यम्प
सः ॥ ८ ॥ जङ्घाभ्याम्पद्भ्यान्धर्मोऽस्मि विशिराजा प्रतिष्ठितः ॥ प्रति क्षत्रे
प्रतितिष्ठामि राष्ट्रेप्रत्यश्वेषु प्रतितिष्ठामि गोषु ॥ ९ ॥ प्रत्यङ्गेषु प्रतितिष्ठाम्यात्मन्प्र

ति प्राणेषुप्रति तिष्ठामि पुष्टे ॥ प्रतिद्यावा पृथिव्योःप्रति तिष्ठामि यज्ञे ॥ १० ॥
त्रयादेवा एकादश त्रयस्त्रिꣳशास्सुराधसः ॥ बृहस्पति पुरोहिता देवस्य सवितु
स्सवे ॥ देवादेवै रवन्तुमा ॥ ११ ॥ प्रथमा द्वितीयै र्द्वितीया स्तृतीयै स्तृती
या स्सत्येन ॥ सत्यँय्यज्ञेन यज्ञो यजुर्भि र्यजूꣳषि सामभिः ॥१२॥ सामान्यृग्भिर्ऋ
चः पुरोऽनु वाक्याभिःपुरोऽनुवाक्या याज्याभिर्याज्या वषट्कारैः ॥ वषट्कारा आहु
तिभि राहुतयो मे कामान्त्समर्धं यन्तु भूस्स्वाहा ॥ १३ ॥ लोमानि प्रयतिर्मम
त्वङ्म आनति रागतिः ॥ माꣳसम्म उपनतिर्व स्वस्थिमज्जाम आनतिः ॥ १४ ॥ ७
हरिःॐ॥

स्वाद्वीन्त्वैकादश ॥ ११ ॥ देवायज्ञँव्विंशतिः ॥ २० ॥ सुरावन्तमेकोनविंश
तिः ॥ १९ ॥ उदीरतामेकविंशतिः ॥ २१ ॥ सोमोराजापञ्च ॥ ५ ॥ सीसेनतन्त्रं

षोळश ॥ १६ ॥ क्षत्रस्यनाभिश्चतुदश ॥ १४ ॥ सप्तानुवाकेषु षडुत्तरशत
म् ॥ १०६ ॥ सोमोराजा त्वन्द्ध्यस्सोम मन्द्धयोन्नाद्रेत एवच ॥ दृष्ट्वा श्रद्धाचवेदे
नदृष्ट्वापरि स्रुतोरसम् ॥ १ ॥ इति शुक्लयजुर्वेद काण्व सँहिता पाठे एक विंश
त्यध्यायः ॥ हरिःॐ

हरिःॐ॥ यद्देवा देव हेळनन्देवा सश्चकृमा वयम् ॥ अग्निर्मातस्मा देनसो
विश्वान्मुञ्च त्वꣳहसः ॥ १ ॥ यदि दिवा यदि नक्तमेनाꣳसि चकृमा वयम् ॥
वायुर्मा तस्मा देनसो विश्वान्मुञ्च त्वꣳ हसः ॥ २ ॥ यदि जाग्रद्यदि स्वप्न
एनाꣳसि चकृमा वयम् ॥ सूर्यो मातस्मा देनसो विश्वान्मुञ्च त्वꣳहसः ॥ ३ ॥
यद्ग्रामे यदरण्ये यत्सभायाँ य्यदिन्द्रिये ॥ यच्छूद्रे यदर्ये यदेनश्च कृमावयम् ॥
यदेकस्याधि धर्मणि तस्या वयजं नमसि ॥ यदापो अघ्न्या इति वरुणे तिश

पा महे ततो वरुणनो मुञ्च ॥ अवभृथ निचुम्पुण निचे रुरसि निचुम्पुण ॥
अवदेवैर्देव कृतमेनो यक्ष्य वमर्त्यैर्मर्त्यै कृतम्पुरु राव्णो देवरि षस्पाहि ॥ समु
द्रे ते हृदयमप्स्वन्तस्सन्त्वा विशन्त्वोषधी रुतापः ॥ सुमित्रियान आप ओष
धयस्सन्तु दुर्मित्रिया स्तस्मै सन्तु ॥ योऽस्मान्द्वेष्टियञ्च वयन्द्विष्मः ॥ ४ ॥
द्रुपदा दिवमुमुचान स्स्विन्नस्स्नातो मलादिव ॥ पूतम्पवित्रेणेवाज्य मापश्शु
न्धन्तु मैनसः ॥ ५ ॥ उद्व यन्तमं सस्परि स्वःपश्यन्त उत्तरम् ॥ देवन्देव
त्रासूर्य मगन्मज्योतिरुत्तमम् ॥ ६ ॥ अपो अद्यान्वचारिषꣳ रसेन समस्टक्ष्म
हि ॥ पयस्वानग्न आगमन्त म्मासꣳ सृज वर्चसा प्रजयाचधनेनच ॥ एधोऽ
स्ये धिषीमहि समिदसि तेजोऽसि तेजो मयि धेहि ॥ ७ ॥ समाववर्ति पृथि
वी समुषा स्समु सूर्यः ॥ समु विश्वमिदञ्जगत् ॥ वैश्वानर ज्योतिर्भूयासँ

ळिवभून्कामान्व्यश्नवै भूस्स्वाहा ॥ ८ ॥ १ ॥

अभ्यादधामि समिधमग्ने व्रतपते त्वयि ॥ व्रतञ्च श्रद्धाञ्चोपै मीन्धेत्वा दी
क्षितो अहम् ॥१॥ यत्र ब्रह्म चक्षत्रञ्च सम्यञ्चौ चरतस्सह ॥ तँल्लोकम्पुण्यम्प्रज्ञे
षँय्यत्र देवास्सहाग्निना ॥ २ ॥ यत्रेन्द्रश्च वायुश्च सम्यञ्चौ चरतस्सह ॥ तँल्लो
कम्पुण्यम्प्रज्ञेषँय्यत्र सेदिर्न विद्यते ॥ ३॥ अꣳशुनाते अꣳशुःपृच्यताम्परुषापरुः ॥
गन्धस्ते सोममवतु मदाय रसो अच्युतः ॥ ४ ॥ सिञ्चन्ति परिषिञ्चन्त्युत्सि
ञ्चन्ति पुनन्तिच ॥ सुरायै बभ्रवै मदे किन्त्वो वदति किन्त्वः ॥ ५ ॥ धाना
वन्तङ्करम्भिणमपूपवन्तमुक्थिनम् ॥ इन्द्र प्रातर्जुषस्वनः ॥ ६ ॥ बृहदिन्द्रा
य गायत मरुतो वृत्रहन्तमम् ॥ येन ज्योतिरजनयन्नृता वृधो देवन्देवाय जा
गृवि ॥ ७ ॥ अध्वर्यो अद्रिभिस्सुतꣳ सोमम्पवित्रआनय ॥ पुनीहीन्द्राय पा
तवे ॥ ८ ॥ २

यो भूतानामधिपतिर्यस्मिँल्लोका अधिश्रिताः ॥ यईशे महतो महाꣳस्तेन गृह्णा
मि त्वामहम्म यिगृह्णामि त्वामहम् ॥ १ ॥ उपयामगृहीतोऽस्यश्विभ्यान्त्वा
सरस्वत्यै त्वेन्द्रायत्वा सुत्राम्णे ॥ एषते योनिरश्विभ्यान्त्वा सरस्वत्यै त्वेन्द्रायत्वा
सुत्राम्णे ॥ २ ॥ प्राणपामे अपानपाश्चक्षुष्पाः श्रोत्रपाश्चमे ॥ वाचोमे विश्वभेषजोमन
सोऽसि विलायकः ॥३॥ अश्विनकृतस्यते सरस्वति कृतस्येन्द्रेण सुत्राम्णाकृतस्य ॥
उपहूत उपहूतस्य भक्षयामि ॥ ४ ॥ ३

समिद्ध इन्द्र उषसामनीके पुरोरुचा पूर्वकृद्वावृधानः ॥ त्रिभिर्देवैस्त्रिꣳशता
वज्रबाहुर्जघान वृत्रँव्विदुरो ववार ॥ १ ॥ नराशꣳसःप्रति शूरो मिमानस्तनूनपा
त्प्रति यज्ञस्यधाम ॥ गोभिर्वपावान्मधुना समञ्जन् हिरण्यैश्चन्द्री यजति प्रचे

ताः ॥ २ ॥ ईळितो देवैर्हरिवाँ२अभिष्टिराजुह्वानोहविषाशर्द्धमानः ॥ पुरन्दरोगो
त्रभिद्वज्रबाहुरायातु यज्ञमुपनो जुषाणः ॥ ३ ॥ जुषाणो बर्हिर्हरिवान्न इन्द्रः
प्राचीनꣳ सीदत्प्रदिशा पृथिव्याः ॥ उरुप्रथाः प्रथमानꣳ स्योनमादित्यैरक्तँव्वसु
भिस्सजोषाः ॥ ४ ॥ इन्द्रन्दुरः कवष्यो धावमाना वृषाणँय्यन्तु जनयस्सुपत्नीः ॥
द्वारो देवीरभितो विश्रयन्ताꣳसुवीरा वीरम्प्रथमानामहोभिः ॥ ५ ॥ उषासान
क्ता बृहती बृहन्तम्पयस्वती सुदुघेशूरमिन्द्रम् ॥ तन्तुन्ततम्पेशसा सँव्वयन्ती दे
वानान्देवँय्यजतस्सुरुक्मे ॥ ६ ॥ दैव्या मिमानामनुषः पुरुत्रा होतारा इन्द्रम्प्र
थमा सुवाचा ॥ मूर्धन्यज्ञस्य मधुना दधाना प्राचीनञ्ज्योतिर्हविषा वृधातः॥७॥
तिस्रो देवीर्हविषा वर्धमाना इन्द्रञ्जुषाणा जनयो नपत्नीः ॥ अच्छिन्नन्तन्तुम्प
यसा सरस्वतीळा देवीभारती विश्वतूर्तिः ॥ ८ ॥ त्वष्टा दधच्छुष्ममिन्द्राय वृ
ष्णेऽपाकोऽचिष्टुर्यशसे पुरूणि ॥ वृषा यजन्वृषणम्भूरि रेता मूर्धन्यज्ञस्य समन
क्तु देवान् ॥ ९ ॥ वनस्पतिरवसृष्टो नपाशैस्त्मन्या समञ्जञ्छमितानदेवः ॥
इन्द्रस्य हव्यैर्जठरम्पृणानस्स्वदातियज्ञम्मधुनाघृतेन ॥ १० ॥ स्तोकानामिन्दुम्प्र
ति शूर इन्द्रो वृषायमाणो वृषभस्तुराषाट् ॥ घृतप्रुषा मनसामोदमानास्स्वाहा
देवा अमृतामादयन्ताम् ॥ ११ ॥ ४

आयात्विन्द्रोवस उपन इहस्तुतस्स धमादस्तु शूरः ॥ वावृधानस्तविषीर्य
स्य पूर्वीर्द्यौर्नक्षत्र मभिभूति पुष्यात् ॥ १ ॥ आन इन्द्रोदूरादान आसादभिष्टि
कृदवसे यासदुग्रः ॥ ओजिष्ठेभिर्नृपतिर्वज्रबाहुस्सङ्गे समत्सु तुर्वणिःपृतन्यून् ॥ २॥
आन इन्द्रो हरिभिर्यात्वच्छार्वाचीनोऽवसे राधसेच ॥ तिष्ठाति वज्री मघवावि
रप्शीमँय्यज्ञमनु नोवाजसातौ ॥ ३ ॥ त्रातारमिन्द्रमवितारमिन्द्रꣳ हवेहवेसुह

वꣳ शूरमिन्द्रम् ॥ ह्वयामि शक्रम्पुरुहूतमिन्द्रꣳ स्वस्तिनो मघवा धात्विन्द्रः ॥४॥
इन्द्रस्सुत्रामा स्ववाँ२अवोभिस्सुमृळीको भवतु विश्ववेदाः ॥ बाधतान्द्वेषो अ
भयङ्कृणोतु सुवीर्यस्य पतयस्स्याम ॥ ५ ॥ तस्य वयꣳ सुमतौ यज्ञियस्यापि
भद्रे सौमनसे स्याम ॥ स सुत्रामा स्ववाँ२इन्द्रो अस्मेआराच्चिद्द्वेषस्सनुतर्युयो
तु ॥ ६ ॥ आमन्द्रैरिन्द्रहरिभिर्याहि मयूररोमभिः ॥ मात्वाकेचिन्नियेमन्वि
न्नपाशिनोति धन्वेव ताँ२इहि ॥ ७ ॥ एवेदिन्द्रँव्वृषणँव्वज्रबाहुँव्वसिष्ठासोअभ्य
र्चन्त्यर्कैः ॥ सनस्तुतो वीरवद्धातु गोमद्ययम्पातस्वस्तिभिस्सदानः ॥ ८ ॥ ५
समिद्धो अग्निरश्विना तप्तो घर्मो विराट्सुतः ॥ दुहे धेनुस्सरस्वती सोमꣳ
शुक्रमिहेन्द्रियम् ॥ १ ॥ तनूपा भिषजा सुतेऽश्विनोभा सरस्वती ॥ मध्वारजाꣳ
सीन्द्रियमिन्द्राय पथिभिर्वहान् ॥२॥ इन्द्रायेन्दुꣳ सरस्वती नराशꣳसेन नग्नहुम् ॥

अधातामश्विना मधु भेषजम्भिषजा सुते ॥ ३ ॥ आजुह्वाना सरस्वतीन्द्राये
न्द्रियाणि वीर्यम् ॥ इळाभिरश्विना इषꣳ समूर्जꣳ सꣳ रयिन्दधुः ॥ ४ ॥ अश्विना
नमुचेस्सुतꣳ सोमꣳ शुक्रम्परिस्रुता ॥ सरस्वती तमाभरद्बर्हिषेन्द्राय पातवे ॥ ५ ॥
कवष्यो नव्यचस्वतीरश्विभ्यान्नदुरो दिशः ॥ इन्द्रोन रोदसी उभेदुहे कामान्त्स
रस्वती ॥ ६ ॥ उषासानक्तमश्विनादिवेन्द्रꣳ सायमिन्द्रियैः ॥ सञ्जानाने सुपेशसा
समञ्जाते सरस्वत्या ॥ ७ ॥ पातन्नो अश्विनादिवा पाहि नक्तꣳ सरस्वती ॥ दै
व्या होतारा भिषजा पातमिन्द्रꣳ सचासुते ॥ ८ ॥ तिस्रस्त्रेधा सरस्वत्यश्विना
भारतीळा ॥ तीव्रम्परिस्रुता सोममिन्द्राय सुषुवुर्मदम् ॥ ९ ॥ अश्विना भेषजम्म
धु भेषजन्नस्सरस्वती ॥ इन्द्रे त्वष्टा यशः श्रियꣳ रूपꣳ रूपमधुस्सुते ॥ १० ॥
ऋतुथेन्द्रो वनस्पतिश्शशमानःपरिस्रुता ॥ कीलालमश्विभ्याम्मधु दुहे धेनुस्सर

स्वती ॥ ११ ॥ गोभिर्न सोममश्विना मासरेण परिस्रुता ॥ समधातꣳ सरस्वत्या
स्वाहेन्द्रे सुतम्मधु ॥ १२ ॥ ६

अश्विना हविरिन्द्रियन्नमुचेर्धिया सरस्वती ॥ आशुक्रमासुराद्वसुमघमिन्द्राय
जभ्रिरे ॥ १ ॥ यमश्विना सरस्वती हविषेन्द्रमवर्द्धयन् ॥ सबिभेदबलम्मघन्नमु
चा आसुरे सचा ॥ २ ॥ तमिन्द्रम्पशवस्सचाश्विनोभा सरस्वती॥ दधाना अभ्य
नूषत हविषा यज्ञ इन्द्रियैः ॥३॥ य इन्द्र इन्द्रियन्दधुस्सविता वरुणो भगः ॥
स सुत्रामा हविष्पतिर्यजमानाय सश्चत ॥४॥ सविता वरुणो दधद्यजमानाय दा
शुषे ॥ आदत्तनमुचेर्वसु सुत्रामा बलमिन्द्रियम् ॥५॥ वरुणःक्षत्रमिन्द्रियम्भगेन
सविता श्रियम् ॥ सुत्रामा यशसा बलन्दधाना यज्ञमाशत ॥६॥ अश्विना गोभि
रिन्द्रिय मश्वेभिर्वीर्यम्बलम् ॥ हविषेन्द्रꣳ सरस्वती यजमानमवर्द्धयन् ॥७॥

ताना सत्या सुपेशसा हिरण्य वर्तनी नरा ॥ सरस्वती हविष्मतीन्द्र कर्मसु नोऽ
वत ॥ ८ ॥ ताभिषजा सुकर्मणा सासुदुघा सरस्वती ॥ सवृत्रहा शतक्रतुरि
न्द्राय दधुरिन्द्रियम् ॥ ९ ॥ युवꣳ सुराममश्विना नमुचा आसुरे सचा ॥ विपि
पानास्सरस्वतीन्द्रङ्कर्मस्वावत ॥ १० ॥ पुत्रमिव पितरा अश्विनो भेन्द्रावथुःका
व्यैर्दꣳसनाभिः ॥ यत्सुरामँव्व्यपिबश्शचीभिस्सरस्वती त्वामघवन्नभिष्णक् ॥११॥
यस्मिन्नश्वास ऋषभासउक्षणो वशामेषा अवसृष्टास आहुताः ॥ कीलालपेसो
मपृष्ठाय वेधसे हृदामतिञ्जनयचारुमग्नये ॥ १२ ॥ अहाव्व्यग्ने हविरास्येते स्रुची
वघृतञ्चम्वीव सोमः ॥ वाजसनिꣳ रयिमस्मे सुवीरम्प्रशस्तन्धेहियशसम्बृहन्त
म् ॥ १३ ॥ ७

अश्विना तेजसा चक्षुः प्राणेन सरस्वती वीर्यम् ॥ वाचेन्द्रो बलेनेन्द्रायद

धुरिन्द्रियम् ॥ १ ॥ गोमद्दूषुणा सत्याश्वावद्यातमश्विना ॥वर्त्तीरुद्रानृपाय्यम् ॥ २ ॥
नयत्परोनान्तर आदधर्षद्वृषणवसू ॥ दुश्शꣳ सोमत्र्यौरिपुः ॥ ३ ॥ तान आ
वोह्ळमश्विना रयिम्पिशङ्ग सन्दृशम् ॥ धिष्ण्यावरिवोविदम् ॥ ४ ॥ पाव
कानस्सरस्वती वाजेभिर्वाजिनीवती ॥ यज्ञँवष्टुधियावसुः ॥ ५ ॥ चोदयित्री
सूनृतानाञ्चेतन्ती सुमतीनाम् ॥ यज्ञन्दधे सरस्वती ॥ ६ ॥ महो अर्णस्स
रस्वती प्रचेतयति केतुना ॥ धियो विश्वा विराजति ॥ ७ ॥ इन्द्रायाहि चि
त्रभानो सुता इमे त्वायवः ॥ अण्वीभिस्तना पूतासः ॥ ८ ॥ इन्द्रायाहिधि
येषितो विप्रजूतस्सुतावतः ॥ उपब्रह्माणि वाघतः ॥ ९ ॥ इन्द्रायाहि तूतुजा
नउपब्रह्माणि हरिवः ॥ सुते दधिष्व नश्चनः ॥ १० ॥ अश्विना पिबताम्मधु
सरस्वत्या सजोषसा ॥ इन्द्रस्सुत्रामा वृत्रहा जुषन्ताꣳ सोम्यम्मधु ॥११॥ ८

हरिःॐ ॥

यद्देवाअष्ट ॥ ८ ॥ अभ्यादधामीतिच ॥८॥ योभूतानाञ्चतस्रः ॥ ४ ॥ सामि
द्धइन्द्रएकादश ॥ ११ ॥ आयात्वष्ट ॥ ८ ॥ समिद्धोअग्निर्द्वादश ॥ १२॥ अश्वि
नाहविस्त्रयोदश ॥ १३ ॥ अश्विना तेजसैकादश ॥ ११ ॥ अष्टानुवाकेषुपञ्चसप्त
तिः ॥ ७५ ॥ इतिशुक्लयजुर्वेदकाण्वसँहितापाठेद्वाविंशत्यध्यायः ॥ हरिःॐ ॥

हरिःॐ ॥ इमम्मे वरुण श्रुधीहवमद्याच मृळय ॥ त्वामवस्युराचके ॥ १ ॥
तत्त्वायामि ब्रह्मणा वन्दमानस्तदाशास्ते यजमानो हविर्भिः ॥ अहेळमानो व
रुणेह बोध्युरुशꣳ समान आयुः प्रमोषीः ॥ २ ॥ त्वन्नोअग्ने वरुणस्य विद्वान्दे
वस्य हेळो अवयासिसीष्ठाः ॥ यजिष्ठोवह्नितमश्शोशुचानो विश्वाद्वेषाꣳसि प्रमु
मुग्ध्यस्मत् ॥ ३ ॥ सत्वन्नो अग्नेऽवमोभवोतीनेदिष्ठो अस्या उषसो व्युष्टौ ॥ अ

वयक्ष्वनो वरुणꣳ रराणोवी हिमृळीकꣳ सुहवोन एधि ॥ ४ ॥ महीमूषुमातरꣳ सुव्रतानामृतस्य पत्नीमवसे हुवेम ॥ तुविक्षत्रामजरन्तीमुरूचीꣳ सुशर्माणमदितिꣳ सुप्रणीतिम् ॥ ५ ॥ सुत्रामाणम्पृथिवीन्द्यामनेहसꣳ सुशर्माणमदितिꣳ सुप्रणीतिम् ॥ दैवीन्नावꣳ स्वरित्रामनागसमस्रवन्तीमारुहेमा स्वस्तये ॥ ६ ॥ सुनावमारुहेयमस्रवन्तीमनागसम् ॥ शतारित्राꣳ स्वस्तये ॥ ७ ॥ आनोमित्रा वरुणा घृतैर्गव्यूतिमुक्षतम् ॥ मध्वारजाꣳसि सुक्रतू ॥ ८ ॥ प्रबा हवासि स्तृत ञ्जीवसेन आनो गव्यूतिमुक्षतङ्घृतेन ॥ आमाजनैश्रवयतँय्युवानाश्रतम्मेमित्रा वरुणा हवेम ॥ ९ ॥ शन्नो भवन्तु वाजिनोहवेषु देवतातामितद्रवस्स्वर्काः ॥ जम्भयन्तोऽहिंव्वृकꣳ रक्षाꣳसि सनेम्यस्मद्युयवन्नमीवाः ॥ १० ॥ तेनोअर्वन्तो हवनश्रुतो हवँव्विश्वे शृण्वन्तु वाजिनो मितद्रवः ॥ सहस्रसा मेधसाता इव

त्मना महो येधनꣳ समिथेषु जभ्रिरे ॥ ११ ॥ वाजे वाजेऽवत वाजिनो नोधनेषु विप्राअमृता ऋतज्ञाः ॥ अस्यमध्वः पिबतमादयध्वन्तृप्तायात पथिभिर्देवयानैः ॥ १२ ॥ १

समिद्धो अग्निस्समिधा सुसमिद्धो वरेण्यः ॥ गायत्रीच्छन्द इन्द्रियन्त्र्यविर्गौर्वयोदधुः ॥ १ ॥ तनूनपाच्छुचिव्रतस्तनूपाश्चसरस्वती ॥ उष्णिहाच्छन्द इन्द्रियन्दित्यवाड्गौर्वयो दधुः ॥ २ ॥ इळाभिरग्निरीड्यस्सोमो देवो अमर्त्यः ॥ अनुष्टुप्छन्द इन्द्रियम्पञ्चाविर्गौर्वयो दधुः ॥ ३ ॥ सुबर्हिरग्निः पूषण्वान्स्तीर्णबर्हिरमर्त्यः ॥ बृहतीच्छन्द इद्रियन्त्रि वत्सोगौर्वयो दधुः ॥ ४ ॥ दुरो देवीर्दिशो महीर्ब्रह्मा देवो बृहस्पतिः॥पङ्क्तिश्छन्द इहेन्द्रियन्तुर्यवाड्गौर्वयो दधुः ॥ ५ ॥ उषे यह्वी सुपेशसा विश्वे देवा अमर्त्याः ॥ त्रिष्टुप्छन्द इहेन्द्रियम्पष्ठवाड्गौर्वयो

दधुः ॥ ६ ॥ दैव्या होतारा भिषजेन्द्रेण सयुजा युजा ॥ जगतीच्छन्द इन्द्रिय
मनड्वान्गौर्वयो दधुः ॥७॥ तिस्रइळा सरस्वती भारती मरुतो विशः ॥ विरा
ट्छन्द इहेन्द्रियन्धेनुर्गौर्नवयो दधुः ॥ ८ ॥ त्वष्टा तुरीपो अद्भुत इन्द्राग्नी पुष्टि
वर्धना ॥ द्विपदाच्छन्द इन्द्रियमुक्षागौर्नवयो दधुः ॥ ९ ॥ शमितानो वनस्पति
स्सविता प्रसुवन्भगम् ॥ ककुप् छन्द इहेन्द्रियँव्वशा वेहद्वयो दधुः ॥ १०॥ स्वा
हा यज्ञँव्वरुणस्सुक्षत्रो भेषजङ्करत् ॥ अतिच्छन्दा इन्द्रियम्बृहदृषभोगौर्वयो
दधुः ॥ ११ ॥ २

वसन्तेन ऋतुना देवा वसवस्त्रिवृता स्तुताः ॥ रथन्तरेण तेजसा हविरिन्द्रे
वयो दधुः ॥ १ ॥ ग्रीष्मेण ऋतुना देवा रुद्राः पञ्चदशे स्तुताः ॥ बृहताय
शसा बलँ हविरिन्द्रे वयो दधुः ॥ २ ॥ वर्षाभि ऋतुना दित्या स्तोमे सप्त

दशे स्तुताः ॥ वैरूपेण विशौजसा हविरिन्द्रे वयो दधुः ॥ ३ ॥ शारदेन ऋ
तुना देवा एकविँश ऋभव स्तुताः ॥ वैराजेन श्रिया श्रियँ हविरिन्द्रे वयो
दधुः ॥ ४ ॥ हेमन्तेन ऋतुना देवास्त्रिणवे मरुत स्तुताः ॥ बलेन शक्वरी
स्सहो हविरिन्द्रे वयो दधुः ॥ ५ ॥ शैशिरेण ऋतुना देवास्त्रय स्त्रिँशेऽ मृता
स्तुताः ॥ सत्येन रेवतीः क्षत्रँ हविरिन्द्रे वयो दधुः ॥ ६ ॥ ३ ॥

होता यक्षत्समि धाग्नि मिळस्पदेऽश्विनेन्द्रँ सरस्वती मजो धूम्रोन गोधूमैः
कुवलैर्भेषजम्मधु ॥ शष्पै र्न तेज इन्द्रिय म्पयस्सोमः परिस्रुता घृतम्मधु व्य
न्त्वा ज्यस्य होतर्यज ॥ १ ॥ होता यक्ष त्तनूनपा त्सरस्वतीमविर्मेषो नभेष
जम्पथा मधुमता भरन्नश्विनेन्द्राय वीर्यम् ॥ बदरै रुपवाका भिर्भेषजन्तो क्म
भिः पयस्सोमः परिस्रुता घृतम्मधु व्यन्त्वा ज्यस्य होतर्यज ॥ २ ॥ होता य

क्षन्नरा शꣳ सन्न नग्नहुम्पतिꣳ सुरया भेषजम्मेषस्सरस्वती भिषग्रथोन चन्द्र
श्विनौ वपा इन्द्रस्य वीर्यम् ॥ बदरै रुपवाका भिर्भेषजन्तो क्कर्मभिःपयस्सोमः
परिस्त्रुता घृतम्मधु व्यन्त्वाज्यस्य होतर्यज ॥ ३ ॥ होता यक्षदिळैळित आजु
ह्वा नस्सरस्वती मिन्द्रम्बलेन वर्धयन्नृषभेण गवेन्द्रियमश्विनेन्द्राय भेषजम् ॥
यवैःकर्कन्धु भिर्मधुलाजै र्नमास रम्पयस्सोमः परिस्त्रुता घृतम्मधु व्यन्त्वाज्यस्य
होतर्यज ॥ ४ ॥ होता यक्षद्बर्हि रूर्णं म्रदा भिषङ्ना सत्या भिषजा श्विना
श्वाशिशुमती भिषग्धेनुस्सरस्वती भिषक् ॥ दुह इन्द्राय भेषज म्पयस्सोमः
परिस्त्रुता घृतम्मधु व्यन्त्वाज्यस्य होतर्यज ॥ ५ ॥ होता यक्षद्दुरो दिशः
कवष्योन व्यचस्वती रश्विभ्यान्न दुरो दिश इन्द्रोन रोदसी दुघे दुहे धेनुस्सर
स्वत्यश्विनेन्द्राय भेषजम् ॥ शुक्रन्न ज्योतिरिन्द्रियम्पयस्सोमःपरिस्त्रुता घृतम्म

धु व्यन्त्वा ज्यस्य होतर्यज ॥ ६ ॥ होता यक्षत्सुपेशसोषेनक्तन्दिवाश्विना
समञ्जाते सरस्वत्या त्विषिमिन्द्रेन भेषजम् ॥ श्येनो न रजसा हृदाश्रियान
मास रम्पयस्सोमःपरिस्त्रुता घृतम्मधु व्यन्त्वा ज्यस्य होतर्यज ॥ ७ ॥ हो
ता यक्षद्दैव्या होतारा भिषजाश्विनेन्द्रन्न जागृवि दिवानक्तन्नभेषजैः ॥ शूषꣳ
सरस्वती भिषक्सीसेन दुह इन्द्रियम्पयस्सोमःपरिस्त्रुता घृतम्मधु व्यन्त्वा ज्यस्य
होतर्यज ॥ ८ ॥ होता यक्षत्तिस्त्रो देवी र्न भेषजन्त्रय स्त्रिधा तवोपसो रूपमि
न्द्रे हिरण्यय मश्विनेळा न भारती ॥ वाचा सरस्वती मह इन्द्राय दुह इन्द्रि
यम्पय स्सोमःपरिस्त्रुता घृतम्मधु व्यन्त्वाज्यस्य होतर्यज ॥ ९ ॥ होता यक्ष
त्सुरे तस मृषभन्नर्यां प सन्त्वष्टारमिन्द्र मश्विना भिषजन्न सरस्वती मोजो न
जूतिरिन्द्रि यँव्वृको नरभसो भिषक् ॥ यशस्सुरया भेषजꣳ श्रिया न मासर

म्पयस्सोमः परिस्रुता घृतम्मधु व्यन्त्वाज्यस्य होतर्यज ॥ १० ॥ होता यक्षद्व
नस्पतिꣳ शमितारꣳ शतक्रतुम्भीमन्न मन्युꣳ राजानँ व्व्याघ्रन्नमसाश्विना ॥
भामꣳ सरस्वती भिषगिन्द्राय दुह इन्द्रियम्पयस्सोमः परिस्रुता घृतम्मधु व्य
न्त्वाज्यस्य होतर्यज ॥ ११ ॥ होता यक्षदग्निꣳ स्वाहाज्यस्य स्तोकानाꣳ स्वा
हा मेदसाम्पृथक्स्वाहा च्छागमश्विभ्याꣳ स्वाहा मेषꣳ सरस्वत्यै ॥ स्वाहर्षभ
भ मिन्द्राय सिꣳ हाय सहस इन्द्रियꣳ स्वाहाग्निन्न भेषजꣳ स्वाहा सोम मि
न्द्रियम् ॥ स्वाहेन्द्रꣳ सुत्रामाणꣳ सवितारँव्वरुणम्भिषजाम्पतिꣳ स्वाहा वनस्प
तिम्प्रियम्पाथोन भेषजम् ॥ स्वाहा देवा आज्यपा जुषाणो अग्निर्भेषजम्पयस्सो
मः परिस्रुता घृतम्मधु व्यन्त्वाज्यस्य होतर्यज ॥ १२ ॥ ४
होता यक्षदश्विनौ छागस्य वपायामेदसोजुषेताꣳ हविर्होतर्यज ॥ होता यक्ष

त्सरस्वतीम्मेषस्य वपायामेदसो जुषताꣳ हविर्होतर्यज ॥ होता यक्षदिन्द्रमृष
भस्य वपायामेदसो जुषताꣳ हविर्होतर्यज ॥ १ ॥ होता यक्षदश्विनौ सरस्वती
मिन्द्रꣳ सुत्रामाणमिमेसोमाः॥सुरामाणश्छागैर्नमेषै ऋषभैस्सुताः ॥ शष्पैर्नतोक्म
भिर्लाजैर्महस्वन्तो मदामासरेण परिष्कृताः ॥ शुक्राः पयस्वन्तोऽमृताः प्रस्थिता
वो मधुश्च्युतस्तानाश्विना सरस्वतीन्द्रस्सुत्रामा वृत्रहा जुषन्ताꣳ सोम्यम्मधु ॥
पिबन्तु मदन्तु व्यन्तु होतर्यज ॥ २ ॥ होता यक्षदश्विनौ छागस्य हविष
आत्ता मद्य मध्यतो मेद उद्भृतम्पुरा द्वेषोभ्यः पुरा पौरुषेय्याग्गृभः ॥ घस्तान्नू
नङ्घासे अज्राणाँय्यवस प्रथमानाꣳ सुमत्क्षराणाꣳ शत रुद्रियाणा मग्निष्वात्ताना
म्पीवो पवसनानाम् ॥ पार्श्वतःश्रोणितश्शिता मतउत्सादतोऽङ्गादङ्गादवत्तानाङ्क
रत एवाश्विनाजुषेताꣳ हविर्होतर्यज ॥ होता यक्षत्सरस्वतीम्मेषस्य हविष आव

य द्द्य मध्यतो मेद उद्भृतम्पुरा द्वेषोभ्यः पुरापौरुषेय्याग्रभः ॥ घस्नन्नूनङ्घासे
अज्राणाँय्यवस प्रथमानाꣳ सुमत्क्षराणाꣳ शत रुद्रियाणा मग्निष्वात्ता नाम्पीवो
पवसनानाम् ॥ पार्श्वतःश्रोणितश्शिता मतउत्सादतोऽङ्गादङ्गा दवत्तानाङ्करदे
वꣳ सरस्वती जुषताꣳ हविर्होतर्यज ॥ होता यक्षदिन्द्रमृषभस्य हविष आवय
द्द्य मध्यतो मेद उद्भृतम्पुरा द्वेषोभ्यःपुरा पौरुषेय्याग्रभः ॥ घस्नन्नूनङ्घासे अ
ज्राणाँय्यवसप्रथमानाꣳ सुमत्क्षराणाꣳशतरुद्रियाणा मग्निष्वात्तानाम्पीवो पवस
नानाम् ॥ पार्श्वतःश्रोणितश्शिता मतउत्सादतोऽङ्गादङ्गादवत्तानाङ्कर देवमिन्द्रो
जुषताꣳ हविर्होतर्यज ॥ ३ ॥ होता यक्षद्वनस्पति मभिहि पिष्टतमया रभिष्ठ
या रशनयाधित ॥ यत्राश्विनोश्छागस्य हविषःप्रिया धामानि यत्र सरस्वत्या
मेषस्य हविषःप्रिया धामानि यत्रेन्द्रस्य ऋषभस्य हविषःप्रिया धामानि ॥ यत्रा

ग्नेःप्रिया धामानि यत्र सोमस्य प्रिया धामानि यत्रेन्द्रस्य सुत्राम्णःप्रिया धामानि ॥
यत्र सवितुःप्रिया धामानि यत्र वरुणस्य प्रिया धामानि यत्र वनस्पतेःप्रिया पा
थाꣳसि ॥ यत्र देवानामाज्यपानाम्प्रिया धामानि यत्राग्नेर्होतुःप्रिया धामानि ॥ तत्रै
तान्प्रस्तुत्येवो पस्तुत्येवो पाव स्रक्षद्रभी यस इव कृत्वी करं देवन्देवो वनस्पति
र्जुषताꣳ हविर्होतर्यज ॥ ४ ॥ होता यक्षदग्निꣳ स्विष्टकृतमयाळग्निरश्विनो श्छा
गस्य हविषः प्रियाधामान्ययाट् सरस्वत्या मेषस्य हविषः प्रियाधामान्ययाळि
न्द्रस्य ऋषभस्य हविषःप्रिया धामानि ॥ अयाळग्नेःप्रिया धामान्ययाट्सोम
स्य प्रिया धामान्ययाळिन्द्रस्य सुत्राम्णःप्रियाधामानि ॥ अयाट्सवितुःप्रिया
धामान्ययाड्वरुणस्य प्रिया धामान्ययाड्वनस्पतेःप्रिया पाथाꣳसि ॥ अयाड्देवा
नामाज्यपानाम्प्रिया धामानि यक्षदग्नेर्होतुःप्रिया धामानि ॥ यक्षत्स्वम्महिमान

मार्य जतामेज्याइर्षः कृणोतु सो अध्वरा जातवेदा जुषतांꣳ हविर्होतर्यज ॥५॥ ५

देवम्बर्हिस्सरस्वती सुदेवमिन्द्रे अश्विना ॥ तेजोन चक्षुरक्ष्योर्बर्हिषा दधु रिन्द्रियँव्वसुवने वसुधेयस्य व्यन्तु यज ॥ १ ॥ देवीर्द्वारो अश्विना भिषजेन्द्रे सरस्वती ॥ प्राणन्नवीर्यन्नसि द्वारो दधुरिन्द्रियँव्वसुवने वसुधेयस्य व्यन्तुयज ॥ २ ॥ देवी उषासा अश्विना सुत्रामेन्द्रे सरस्वती ॥ बलन्नवाचं मास्य उ षाभ्यान्दधुरिन्द्रियँव्वसुवने वसु धेयस्य व्यन्तु यज ॥ ३ ॥ देवी जोष्ट्री सरस्व त्यश्विनेन्द्रमवर्द्धयन् ॥ श्रोत्रन्नकर्णयोर्यशो जोष्ट्रीभ्यान्दधुरिन्द्रियँव्वसुवने व सुधेयस्य व्यन्तु यज ॥ ४ ॥ देवी ऊर्जाहुती दुघे सुदुघेन्द्रे सरस्वत्यश्विनाभि षजावतः ॥ शुक्रन्नज्योतिस्तनयो राहुती धत्त इन्द्रियँव्वसुवने वसुधेयस्य व्य न्तुयज ॥ ५ ॥ देवा देवानाम्भिषजा होतारा इन्द्रमश्विना वषट्कारैस्सरस्व ती त्विषिन्न हृदये मतिम् ॥ होतृभ्यान्दधुरिन्द्रियँव्वसुवने वसुधेयस्य व्यन्तु यज ॥ ६ ॥ देवीस्तिस्रस्तिस्रो देवीरश्विनेळा सरस्वती ॥ शूषन्नमध्ये नाभ्यामिन्द्राय दधुरिन्द्रियँव्वसुवने वसुधेयस्य व्यन्तु यज ॥ ७ ॥ देव इन्द्रो नराशꣳसस्त्रि वरूथस्सरस्वत्याश्विभ्यामीयते रथः ॥ रेतोन रूपममृतञ्जनित्र मिन्द्राय त्वष्टा दधदिन्द्रियाणि वसुवने वसुधेयस्य व्यन्तु यज ॥ ८ ॥ देवो देवैर्वनस्पतिर्हिरण्य पर्णो अश्विभ्याꣳ सरस्वत्या सुपिप्पल इन्द्राय पच्यते मधु ॥ ओजोन जूतिर्ऋषभो नभामँव्वनस्पतिर्नो दधदिन्द्रियाणि वसुवने वसुधेयस्यव्य न्तु यज ॥ ९ ॥ देवम्बर्हि र्वारितीना मध्वरे स्तीर्णमश्विभ्यामूर्णम्रदास्सरस्वत्या स्योनमिन्द्रते सदः ॥ ईशायै मन्युꣳ राजानम्बर्हिषा दधुरिन्द्रियँव्वसुवने वसु धेयस्य व्यन्तु यज ॥ १० ॥ देवो अग्निस्स्विष्ट कृद्देवा न्यक्षद्यथा यथꣳ होतारा

इन्द्रमश्विना वाचा वाचꣳ सरस्वती मग्निꣳ सोमꣳ स्विष्टकृत् ॥ स्विष्टइन्द्रस्सु त्रामा सविता वरुणो भिषगिष्टो देवो वनस्पतिस्स्विष्टादेवा आज्यपाः ॥ स्विष्टो अग्निरग्निना होताहोत्रे स्विष्टकृद्यशो नदधदिन्द्रिय मूर्जमपचितिꣳ स्वधाँव्वसुव नं वसुधेयस्य व्यन्तु यज ॥ ११ ॥ अग्निमद्यहोतारमवृणी तायँय्यजमानःपचन्प क्तीः पचन्पुरोळाशान्बध्नन्नश्विभ्याञ्छागꣳ सरस्वत्यै मेषमिन्द्राय ऋषभम् ॥ सुन्वन्नाश्विभ्याꣳ सरस्वत्या इन्द्राय सुत्राम्णे सुरासोमान् ॥ १२ ॥ सूपस्थाअ द्यदेवो वनस्पतिरभवदाश्विभ्याञ्छागेन सरस्वत्यै मेषेणेन्द्राय ऋषभेण ॥ अक्ष ꣳस्तान्मे दस्तःप्रति पचतागृभीषतावी वृधन्त पुरोळाशैरपुरश्विना सरस्वतीन्द्र स्सुत्रामा सुरासोमान् ॥ १३ ॥ त्वामद्य ऋषआर्षेय ऋषीणान्नपाद वृणीतायँ य्यजमानो बहुभ्य आसङ्गतेभ्य एषमे देवेषु वसुवार्यायक्ष्यतइति ॥ तायादेवा

देवदा नान्यदुस्तान्यस्मा आचशा स्वाचं गुरस्वेषितश्च होतरसि भद्रवाच्यायप्रे षितो मानुषस्सूक्त वाकाय सूक्ताब्रूहि ॥ १४ ॥ ६ ॥ हरिःॐ ॥

इमम्मे वरुण द्वादश ॥ १२ ॥ समिद्धो अग्निरेकादश ॥ ११ ॥ वसन्तेन षट् ॥ ६ ॥ होतायक्षद्द्वादश ॥ १२ ॥ होतायक्षदश्विनौ छागस्य पञ्च ॥ ५ ॥ देवम्बर्हिं श्चतुर्दश ॥ १४ ॥ षळनुवाकेषु षष्टिः ॥ ६० ॥ कृष्णइमम्मेषष्टिः

समिद्धोऽग्निर्गायत्री =यविस्वनून पोष्णिहाम् ॥ इळाभिरनुष्टुप्पश्चा त्रिस्सुब र्हिर्बृहत्यथ ॥ १ ॥ त्रिवत्सो हि दुरःपङ्क्ति श्छन्दो वै तुर्यवाट्तथा ॥ उषे त्रिष्टु प्पष्ठवाट्च दैव्या वै जगत्यथ ॥ २ ॥ अनड्वाँस्तिस्त्रइळा विराड्धेनुस्ततःपरम् ॥ त्वष्टानु द्विपदा मुक्षा शमिताच ककुब्वशा ॥ ३ ॥ स्वाहा यज्ञ मतिच्छन्दा बृह द्वौश्च वयोदधुः ॥ वसन्तेनच वसवो रथन्तर मितिस्मृताः ॥ ४ ॥ ग्रीष्मेण रुद्रा

बृहता वर्षादित्याःक्रमेणहि ॥ वैरूपेणपुन ब्रौंध्याःशारदेनैकविंशः ॥ ५ ॥ वैरा
जेनाथ हेमन्त स्त्रिणवोहिबलेनच ॥ शैशिरेण त्वयस्त्रिंशो सत्येन रेवतीस्तथा ॥ ६ ॥
होतायक्ष त्समिच्छषैपे स्तनूनपाद्दवैररुप ॥ नरा शम्बदरै ह्रींळे ळितश्चतु यवै
स्ततः ॥ ७ ॥ कर्कम्बर्हिं दुंहे वैहि दुरःशुक्रं सुपे श्यनः ॥ दैव्या शूषश्च तिस्त्रश्च
वाचा सरस्वती महः ॥ ८ ॥ सुरेतसं यशो वैच वनस्पतिंहिभामितः ॥ अग्निंतु
ऋषभ मिन्द्रं स्वाहा देवा वदेत्क्रमम् ॥ ९ ॥ होता यक्षदश्विनौ छागस्याश्वि
नौ सरस्वतिम् ॥ होतायक्षदाश्विनौचच्छागस्याथ वनस्पातिम् ॥ १० ॥ अग्निं
स्विष्टकृतन्देवं बर्हिस्तेजोन चक्षुः ॥ देवीद्वारःप्राणन्देवी उषासा बलमतःपर
म् ॥ ११ ॥ देवीजोष्ट्री श्रोत्रन्देवी ऊर्जाहुती दुघेतथा ॥ शुक्रश्च देवा देवा
नां होता देवीस्तु तिस्त्रः ॥ १२ ॥ शूषश्च देव इन्द्रश्च रेतो देवश्च देवः ॥

ओजोन जूतिर्देवश्च बर्हिरीशा क्रमेणतु ॥ १३ ॥ देवोऽग्निस्विष्ट कृद्देवानग्निम
द्यसु न्वन्यथा ॥ सूपस्था अद्यदेऽवोथा क्षंस्तान्मेद एवहि ॥ १४ ॥ त्वामद्यऋ
ष आर्षेय इतिनित्यं पठन्नरः ॥ स वाङ्निपुणोभूत्वा मोदतेहिसदा बुधः ॥ १५ ॥
हरिः ॐ ॥ तेजोऽसि शुक्रममृतमायुष्पाआयुर्मे पाहि ॥ देवस्य त्वा सवि
तुः प्रसवेऽश्विनोर्बाहुभ्याम्पूष्णोहस्ताभ्यामाददे ॥ १ ॥ इमामगृभ्णन्रशनामृतस्य
पूर्व आयुषि विदथेषु कव्या ॥ सानो अस्मिन्त्सुत आबभूव ऋतस्य सामन्त्सर
मारपन्ती ॥ २ ॥ अभिधा असि भुवनमसियन्तासि धर्ता ॥ सत्वमग्निंवैश्वानर
ँ सप्रथ सङ्गच्छ स्वाहा कृतस्स्वगात्वा देवेभ्यः ॥ ३ ॥ प्रजापतये ब्रह्मन्नश्वम्भ
न्त्स्यामिदेवेभ्यःप्रजापतये तेन राध्यासम् ॥ तम्बधान देवेभ्यः प्रजापतये तेन
राध्नुहि ॥ प्रजापतये त्वा जुष्टम्प्रोक्षामीन्द्राग्निभ्यान्त्वा जुष्टम्प्रोक्षामि वायवे

त्वा जुष्टम्प्रोक्षामि विश्वेभ्यस्त्वा देवेभ्यो जुष्टम्प्रोक्षामि सर्वेभ्यस्त्वा देवेभ्यो
जुष्टम्प्रोक्षामि ॥ ४ ॥ यो अर्वन्तञ्जिघांꣳ सतितमभ्यमीतिवरुणः ॥ परो मर्तः
परःश्वा ॥ ५ ॥ १

अग्नये स्वाहा सोमाय स्वाहा पाम्मोदाय स्वाहा सवित्रे स्वाहा वायवे
स्वाहा विष्णवे स्वाहा ॥ इन्द्राय स्वाहा बृहस्पते येस्वाहा मित्राय स्वाहा
वरुणाय स्वाहा ॥ १ ॥ २

हिङ्काराय स्वाहा हिङ्कृताय स्वाहा क्रन्दते स्वाहा वक्रन्दाय स्वाहा ॥
प्रोथते स्वाहा प्रप्रोथाय स्वाहा गन्धाय स्वाहा घ्राताय स्वाहा ॥ १ ॥ नि
विष्टाय स्वाहोपविष्टाय स्वाहा सन्दिताय स्वाहा वल्गते स्वाहा ॥ आसीना
यस्वाहा शयानाय स्वाहा स्वपते स्वाहा जाग्रते स्वाहा ॥ २ ॥ कूजते स्वाहा

प्रबुद्धाय स्वाहा विजृम्भमाणाय स्वाहा विचृत्ताय स्वाहा ॥ सꣳहानाय स्वा
होपस्थिताय स्वाहा यनाय स्वाहा प्रायणाय स्वाहा ॥ ३ ॥ यते स्वाहा धावते
स्वाहोद्द्रावाय स्वाहोद्द्रुताय स्वाहा ॥ शूकाराय स्वाहा शूकृताय स्वाहा निष
ण्णाय स्वाहोत्थिताय स्वाहा ॥ ४ ॥ जवाय स्वाहा बलाय स्वाहा विवर्तमा
नाय स्वाहा विवृत्ताय स्वाहा ॥ विधून्वानाय स्वाहा विधूताय स्वाहा शुश्रू
षमाणाय स्वाहा शृण्वते स्वाहा ॥ ५ ॥ ईक्षमाणाय स्वाहेक्षिताय स्वाहा वी
क्षिताय स्वाहा निमेषाय स्वाहा ॥ यदत्ति तस्मै स्वाहा यत्पिबति तस्मै स्वाहा
यन्मूत्रङ्करोति तस्मै स्वाहा कुर्वते स्वाहा कृताय स्वाहा ॥ ६ ॥ ३

तत्स वितुर्वरेण्यम्भर्गो देवस्य धीमहि ॥ धियो योनः प्रचोदयात् ॥ १ ॥
हिरण्यपाणि मूतये सवितार मुपह्वये ॥ सचेत्ता देवता पदम् ॥ २ ॥ देव

स्य चेततो महीम्प्रसवितुर्हवामहे ॥ सुमतिꣳ सत्यराधसम् ॥ ३ ॥ सुष्टुतिꣳ
सुमती वृधो रातिꣳ सवितुरीमहे ॥ प्रदेवाय मतीविदे ॥ ४ ॥ रातिꣳ सत्प
तिम्महे सवितारमुपह्वये ॥ आसवन्देववीतये ॥ ५ ॥ देवस्य सवितुर्मतिमा
सवँव्विश्वदेव्यम् ॥ धियाभर्गम्मनामहे ॥ ६ ॥ अग्निꣳ स्तोमेन बोधय समि
धानो अमर्त्यम् ॥ हव्या देवेषु नोदधत् ॥ ७ ॥ सहव्यवाळमर्त्य उशिग्दूत
श्चनो हितः ॥ अग्निर्धिया समृण्वती ॥ ८ ॥ तन्त्वा घृतस्न ईमहे चित्रभानो
स्वर्विदम् ॥ देवाँ२आवीतये वह ॥ ९ ॥ अग्निन्दूतम्पुरो दधे हव्यवाह मुप
ब्रुवे ॥ देवाँ२आसादयादिह ॥ १० ॥ ४

अजीजनोहि पवमानसूर्यँव्विधारेशक्मना पयः ॥ गोजीरयारꣳहमाणः
पुरन्ध्या ॥ १ ॥ ५

----------------*



वैश्वानरꣳ हवामह ऋतस्य ज्योतिषस्पतिम् ॥ अजस्रङ्घर्ममीमहे ॥ उपयामगृ
हीतोऽसि वैश्वानराय त्वैष ते योनिर्वैश्वानराय त्वा ॥ १ ॥ ५

वैश्वानरो न ऊतय आप्रयातु परावतः ॥ अग्निरुक्थेन वाहसा ॥ उपयामगृ
हीतोऽसि वैश्वानराय त्वैष ते योनिर्वैश्वानराय त्वा ॥ १ ॥ ६

वैश्वानरस्य सुमतौ स्याम राजा हि कम्भुवनानामभिश्रीः ॥ इतो जातो
विश्वमिदँव्विचष्टे वैश्वानरो यतते सूर्येण ॥ उपयामगृहीतोऽसि वैश्वानराय त्वैष
ते योनिर्वैश्वानराय त्वा ॥ १ ॥ ७

मरुत्वाँ२इन्द्र वृषभो रणाय पिबा सोम मनुष्वधम्मदाय ॥ आसिञ्चस्व ज
ठरे मध्व ऊर्मिन्त्वꣳ राजासि प्रतिपत्सुतानाम् ॥ उपयामगृहीतोऽसीन्द्रायत्वा
मरुत्वत एषते योनिरिन्द्रायत्वा मरुत्वते ॥ १ ॥ ८

जनेभ्यः ॥ २ ॥ ब्रह्मराजन्याभ्याँ शूद्राय चार्याय च स्वाय चारणाय च ॥
प्रियो देवानान्दक्षिणायै दातुरिह भूयासमयम्मे कामस्समृध्यता मुपमादो न
मतु ॥ ३ ॥ १

बृहस्पते अति यदर्यो अर्हाद्द्युमद्विभाति क्रतुमज्जनेषु ॥ यद्दीदयच्छवस
ऋतप्रजात तदस्मासु द्रविणन्धेहिचित्रम् ॥ उपयामगृहीतोऽसि बृहस्पतयेत्वैष
ते योनिर्बृहस्पतये त्वा ॥ १ ॥ २

इन्द्र गोमन्निहायाहि पिबा सोमँ शतक्रतो ॥ विद्यद्भिर्ग्रावभिस्सुतम् ॥
उपयामगृहीतोऽसीन्द्राय त्वा गोमत एष ते योनिरिन्द्राय त्वा गोमते ॥ १ ॥ ३

ऋतावानँवैश्वानरमृतस्य ज्योतिषस्पतिम् ॥ अजस्रङ्घर्ममीमहे ॥ उपयाम
गृहीतोऽसि वैश्वानराय त्वैष ते योनिर्वैश्वानराय त्वा ॥ १ ॥ ४

महाँ२इन्द्रो वज्रहस्तःषोळशी शर्मयच्छतु ॥ हन्तु पाप्मानँयोऽस्मान्द्वेष्टि ॥
उपयामगृहीतोऽसीन्द्रायत्वा षोळशिन एषते योनिरिन्द्रायत्वा षोळशिने ॥१॥ ९

अग्निर्ऋषिः पवमानःपाञ्चजन्यः पुरोहितः ॥ तमीमहे महागयम् ॥१॥ १०

अनु वीरैरनु पुष्यास्म गोभि रन्वश्वैरनु सर्वेण पुष्टैः ॥ अनु द्विपदानु चतु
ष्पदा वयन्देवा नो यज्ञमृतु थानयन्तु ॥ १ ॥ ११

आनो गोत्रा दर्दृहि गोपते गास्समस्मभ्यँ सनयो यन्तु वाजाः ॥ दिव
क्षा असि वृषभ सत्यशुष्मोऽस्मभ्युँ सुमघवन्बोधि गोदाः ॥ १ ॥१२॥ हरिःॐ॥

अग्निश्चतिस्रः ॥३॥ बृहस्पतएका ॥ १ ॥ इन्द्रगोमन् ॥१॥ ऋतावानम् ॥ १॥
वैश्वानरम् ॥ १ ॥ वैश्वानरः ॥ १ ॥ वैश्वानरस्यसुमतौ ॥१॥ मरुत्वाँ२इन्द्रः ॥१॥
महाँ२इन्द्रः ॥ १ ॥ अग्निर्ऋषिः ॥ १ ॥ अनुवीरैः ॥१॥ आनोगोत्राइत्येकैका ॥१॥

द्वादशानुवाकेषु चतुर्दश ॥१४॥ इतिशुक्लयजुर्वेदकाण्वसँहितापाठेअष्टविंशति
तमोऽध्यायः ॥ हरिःॐ ॥

हरिःॐ ॥ समा॑ स्त्वाग्न ऋतवो॑ वर्धयन्तुसँव्वत्सरा ऋषयो यानि सत्या ॥
सन्दिव्व्येनेर्दीदिहि रोचनेन विश्वा आभाहि प्रदिशश्चतस्त्रः ॥१॥ सञ्चेध्यस्वाग्ने
प्रचेबोधयैनमुच्चतिष्ठ महते सौभगाय ॥ माचे रिषदुपसत्तातें अग्ने ब्रह्माणस्ते य
शसस्सन्तु मान्ये ॥ २ ॥ त्वामग्ने वृणते ब्राह्मणा इमे शिवो अग्ने सँव्वरणे भवा
नः ॥ सपत्नहानो अभिमातिजिच्चस्वे गये जागृह्यप्रयुच्छन् ॥ ३ ॥ इहैवाग्ने
अधि धारया रयिम्मात्वा निक्रन्पूर्वचितो निकारिणः ॥ क्षत्रमग्ने सुयममस्तु
तुभ्यमुपसत्ता वर्धतान्ते अनिष्टृतः ॥ ४ ॥ क्षत्रेणाग्ने स्वायुस्सꣳरभस्व मित्रेणा
ग्ने मित्रधेयेयतस्व ॥ सजातानाम्मध्यमस्था एधि राज्ञामग्ने विहव्यो दीदिहीह ॥५॥

अति निहो अति स्त्रिधोऽत्यचित्तिमत्यरातिमग्ने ॥ विश्वाह्यग्ने दुरिता सहस्वाथा
स्मभ्यꣳ सहवीरꣳ रयिन्दाः ॥ ६ ॥ अनाधृष्यो जातवेदा अनिष्टृतो विराळग्ने
क्षत्रभृद्दीदिहीह ॥ विश्वा आशाः प्रमुञ्चन्मानुषीर्भियश्शिवाभिरद्य परिपाहिनो
वृधे ॥ ७ ॥ बृहस्पते सवितर्बोधयैनꣳ सꣳशितञ्चित्सन्तराꣳ सꣳशिशाधि ॥
वर्धयैनम्महते सौभगाय विश्वे एनमनुमदन्तु देवाः ॥ ८ ॥ अमुत्रभूयादथय
द्यमस्य बृहस्पते अभिशस्तेरमुञ्चः ॥ प्रत्यौहतामश्विना मृत्युमस्माद्देवानामग्ने
भिषजा शचीभिः ॥ ९ ॥ उद्वयन्तमस सस्परिस्वःपश्यन्त उत्तरम् ॥ देवन्देव
त्रा सूर्यमगन्मज्योतिरुत्तमम् ॥ १० ॥ १

ऊर्ध्वा अस्य समिधो भवन्त्यूर्ध्वा शुक्राशोचीꣳष्यग्नेः ॥ द्युमत्तमा सुप्रतीकस्य
सूनोः ॥ १ ॥ तनूनपादसुरो विश्ववेदा देवो देवेषु देवः ॥ पथो अनक्त मध्वा

घृतेन ॥ २ ॥ मध्वा यज्ञन्नक्षसे प्रीणानो नराशꣳसो अग्ने ॥ सुकृद्देवस्सविता
विश्ववारः ॥ ३ ॥ अच्छायमेति शवसा घृतेनेळानो वह्निर्नमसा ॥ अग्निꣳ स्रुचो
अध्वरेषु प्रयत्सु ॥ ४ ॥ स यक्षदस्य महिमानमग्नेस्सईम्मन्द्रा सुप्रयसः ॥ वसु
श्चेतिष्ठो वसुधातमश्च ॥ ५ ॥ द्वारोदेवीरन्वस्य विश्वे व्रता ददन्ते अग्नेः ॥ उरु
व्यचसो धाम्ना पत्यमानाः ॥ ६ ॥ ते अस्य योषणे दिव्ये नयोना उषासा
नक्ता ॥ इमँय्यज्ञमवतामध्वरन्नः ॥ ७ ॥ दैव्या होतारा ऊर्ध्वमध्वरन्नोऽग्नेर्जिह्वा
माभि गृणीतम् ॥ कृणु तन्नस्स्विष्टिम् ॥ ८ ॥ तिस्रो देवीर्बर्हिरेदꣳ सदन्त्विळा
सरस्वती भारती ॥ महीगृणाना ॥ ९ ॥ तन्नस्तुरीपमद्भुतम्पुरुक्षु त्वष्टा सुवीरं
म् ॥ रायस्पोषँव्विष्यतु नाभिमस्मे ॥ १० ॥ वनस्पतेऽवस्रजा रराणस्त्मना देवेषु ॥
अग्निर्हव्यꣳ शमिता सूदयाति ॥ ११ ॥ अग्ने स्वाहा कृणुहि जातवेद इन्द्राय ह

व्यम् ॥ विश्वेदेवा हविरिदञ्जुषन्ताम् ॥ १२ ॥ २

पीवो अन्नारयि वृधस्सुमेधाः श्वेतस्सिषक्ति नियुतामभिश्रीः ॥ ते वायवे
समनसो वितस्थुर्विश्वेन्नरस्स्वपत्यानिचक्रुः ॥ १ ॥ राये नु यञ्जज्ञतूरोदसी
मेराये देवी धिषणा धाति देवम् ॥ अध वायुन्नियुतस्सश्चत स्वा उतश्वेतँव्व
सु धितिन्निरेके ॥ २ ॥ वायुरग्रे गा यज्ञप्रीस्साकङ्गन्मनसा यज्ञम् ॥ शिवो
नियुद्भिश्शिवाभिः ॥ ३ ॥ प्रयाभिर्यासि दाश्वाꣳसमच्छा नियुद्भिर्वायु इष्टये
दुरोणे ॥ निनो रयिꣳ सु भोजसँय्युवस्व निवीरङ्गव्यमश्व्यञ्चराधः ॥ ४ ॥ वायो
ये ते सहस्रिणो रथासस्तेभिरागहि ॥ नियुत्वान्त्सोमपीतये ॥ ५ ॥ एकया च दशभिश्च स्वभूते द्वाभ्यामिष्टये विꣳशती च ॥ तिसृभिश्च वहसे त्रिꣳ
शताचनियुद्भि र्वायु इहताविमुञ्च ॥ ६ ॥ नियुत्वान्वायु आगह्ययꣳ शुक्रो

अयामि ते ॥ गन्तासि सुन्वतो गृहम् ॥ ७ ॥ वायो शुक्रो अयामिते मध्वो
अग्रन्दिविष्टिषु ॥ आयाहि सोमपीतये स्पार्हो देव नियुत्वता॥८॥ आ नो नियुद्भि
श्शतिनीभिरध्वरꣳ सहस्रिणीभिरुपयाहि यज्ञम् ॥ वायो अस्मिन्त्सवने मादयस्व
यूयम्पात स्वस्तिभिस्सदा नः ॥ ९ ॥ तव वायवृतस्पते त्वष्टुर्जामातरद्भुत ॥
अवाꣳस्यावृणीमहे ॥ १० ॥ ३

हिरण्य गर्भ इत्येषः ॥ ये नद्यौरुग्रा पृथिवीच दृह्ळा येन स्वस्तभितँ
य्येन नाकः ॥ यो अन्तरिक्षे रजसो विमानः कस्मै देवाय हविषा विधेम ॥ १ ॥
यङ्क्रन्दसी अवसा तस्तभाने अभ्यैक्षेताम्मनसा रेजमाने ॥ यत्राधिसूर उदि
तो विभाति कस्मै देवाय हविषा विधेम ॥ २ ॥ आपो ह्यद्बृहतीर्विश्वमाय
न्गर्भन्दधाना जनयन्तीरग्निम् ॥ ततो देवानाꣳ समवर्तता सुरेकः कस्मै देवा

य हविषा विधेम ॥ ३ ॥ यश्चिदापो महिना पर्यपश्यद्दक्षन्दधाना जनयन्तीर्य
ज्ञम् ॥ यो देवेष्वधि देव एक आसीत्कस्मै देवाय हविषा विधेम ॥ मानो
हिꣳसीज्जनिता यः पृथिव्या यो वादिवꣳ सत्यधर्मा जजान ॥ यश्चापश्चन्द्रा
बृहतीर्जजान कस्मै देवाय हविषा विधेम ॥ प्रजापते नत्वदेतान्यन्यो विश्वा
जातानि परिता बभूव ॥ यत्कामास्ते जुहुमस्तन्नो अस्तुवयꣳ स्यामपतयो र
यीणाम् ॥ ४ ॥ ४

अग्न आयूꣳषि पवस आसुवोर्जमिषञ्चनः ॥ आरेबाधस्व दुच्छुनाम् ॥१॥
अग्ने पवस्व स्वपा अस्मे वर्चस्सुवीर्यम् ॥ दधद्रयिम्मयिपोषम् ॥ २ ॥ अग्नि
र्ऋषिःपवमानः पाञ्चजन्यः पुरोहितः ॥ तमीमहे महागयम् ॥ ३ ॥ अभित्वा
शूरनोनुमोऽदुग्धा इव धेनवः ॥ ईशानमस्य जगतस्स्वर्दृशमीशानमिन्द्र तस्थु

र्षः ॥ ४ ॥ नत्वावाँ२अन्यो दि॒व्योन पार्थिवोन जातोन जनिष्यते ॥ अश्वा
यन्तो मघवन्निन्द्र वाजिनो गव्यन्तस्त्वा हवामहे ॥ ५ ॥ त्वामिद्धि हवामहे
सातौ वाजस्य कारवः ॥ त्वाँव्वृत्रेष्विन्द्र सत्पतिन्नरस्त्वाङ्काष्ठास्वर्वतः ॥ ६ ॥
सत्वन्नश्चित्र वज्रहस्त धृष्णुया महस्तवानो अद्रिवः ॥ गामश्वꣳ रथ्यमिन्द्र स
ङ्किर सत्रावाजन्न जिग्युषे ॥ ७ ॥ कया नश्चित्र आभुवदूती सदावृधस्सखा ॥
कया शचिष्ठया वृता ॥ ८ ॥ कस्त्वा सत्यो मदानाम्मꣳहिष्ठो मत्सदन्धसः ॥
दृह्ळाचिदारु जेवसु ॥ ९ ॥ अभीषुणस्सखीनामविता जरितॄणाम् ॥ शतम्भ
वास्यूतये ॥ १० ॥ यज्ञायज्ञावो अग्नये गिरा गिरा चदक्षसे ॥ प्रप्रवयममृ
तञ्जातवेदसम्प्रियम्मित्रन्नशꣳसिषम् ॥ ११ ॥ ऊर्जो नपातꣳसहिना यमस्म
युर्दाशेम हव्यदातये ॥ भुवद्वाजेष्ववि॒ता भुवद्वृध उतत्राता तनूनाम् ॥ १२ ॥ ५

संव्वत्सरोऽसि परिवत्सरोऽसीदावत्सरोऽसीद्वत्सरोऽसि वत्सरोऽसि ॥ उष
सस्ते कल्पन्तामहोरात्रास्ते कल्पन्तामर्धमासास्ते कल्पन्ताम्मासास्ते कल्पन्तामृ
तवस्ते कल्पन्ताꣳ संव्वत्सरस्ते कल्पताम् ॥ १ ॥ प्रेत्या एत्यै सञ्चाञ्च प्रचसा
रय ॥ सुपर्णचिदसि तया देवतयाङ्गिर स्वद्ध्रुवस्सीद ॥ २ ॥ ६ ॥ हरिःॐ

समास्त्वा दश ॥ १० ॥ ऊर्ध्वा द्वादश ॥ १२ ॥ पीवो अन्नादश ॥ १० ॥
हिरण्यगर्भश्चतस्रः ॥ ४ ॥ अग्नआयूꣳषिद्वादश ॥ १२ ॥ संव्वत्सरोद्वे ॥ २ ॥
षडनुवाकेषु पञ्चाशत् ॥ ५० ॥ इषेदेवस्य समाःपञ्चाशत् ॥ इति शुक्लयजुर्वेद
काण्व संहितापाठे एकोनविंशतितमोऽध्यायः ॥ हरिः ॐ ॥

हरिःॐ॥होतायक्षत्समिधेन्द्रमिळस्पदे नाभा पृथिव्या अधि ॥ दिवो वर्ष्म
न्त्समिध्यत ओजिष्ठश्चर्षणी सहाँ व्वे त्वाज्यस्य होतर्यज ॥ १ ॥ होतायक्ष

त्तनूनपातमूतिभिर्जेतारमपराजितम् ॥ इन्द्रन्देवꣳ स्वर्विदम्पथिभिर्मधुमत्त
मैर्नराशꣳसेन तेजसा वेत्वाज्यस्य होतर्यज ॥२॥ होतायक्षदिळाभिरिन्द्रमीळितमा
जुह्वानममर्त्यम् ॥ देवो देवैस्सवीर्यो वज्रहस्तः पुरन्दरो वेत्वाज्यस्य होतर्यज ॥३॥
होता यक्षद्बर्हिषीन्द्रन्निषद्वरव्वृषभन्नर्यापसम् ॥ वसुभी रुद्रैरादित्यैस्सयु
ग्भिर्बर्हिरासदद्वेत्वाज्यस्य होतर्यज ॥ ४ ॥ होता यक्षदोजोन वीर्यꣳ सहो द्वार
इन्द्रमवर्धयन् ॥ सुप्रायणा अस्मिन्यज्ञे विश्रयन्तामृतावृधो द्वार इन्द्राय मीढ्षु
षे व्यन्त्वाज्यस्य होतर्यज ॥ ५ ॥ होता यक्षदुषे इन्द्रस्य धेनू सुदुघे मातरा
मही ॥ सवातरौ न तेजसा वत्समिन्द्रमवर्धताँव्वीतामाज्यस्य होतर्यज ॥ ६ ॥
होतायक्षद्दैव्या होतारा भिषजा सखाया हविषेन्द्रम्भिषज्यतः ॥ कवी
देवौ प्रचेतसा इन्द्राय धत्त इन्द्रियँव्वीतामाज्यस्य होतर्यज ॥ ७ ॥ होता यक्ष

त्तिस्रो देवी र्न भेषजन्त्रयस्त्रिधातवोपस इळा सरस्वती भारती महीः ॥ इन्द्र
पत्नीर्हविष्मतीर्व्यन्त्वाज्यस्य होतर्यज ॥ ८ ॥ होता यक्षत्त्वष्टारमिन्द्रन्देव
म्भिषजꣳ सुयजङ्घृतश्रियम् ॥ पुरुरूपꣳ सुरेतसम्मघोन मिन्द्राय त्वष्टा द
धदिन्द्रियाणि वेत्वाज्यस्य होतर्यज ॥ ९ ॥ होता यक्षद्वनस्पतिꣳ शमितारꣳ
शतक्रतुन्धियो जोष्टारमिन्द्रियम् ॥ मध्वा समञ्जन्पथिभिस्सुगेभिस्स्वदाति य
ज्ञम्मधुना घृतेन वेत्वाज्यस्य होतर्यज ॥ १० ॥ होता यक्षदिन्द्रꣳ स्वाहाज्य
स्य स्वाहा मेदसस्स्वाहा स्तोकानाꣳ स्वाहा स्वाहा कृतीनाꣳ स्वाहा हव्यसूक्ती
नाम् ॥ स्वाहा देवा आज्यपाजुषाणा इन्द्र आज्यस्य व्यन्तु होतर्यज ॥ ११ ॥ १

देवम्बर्हिरिन्द्रꣳ सुदेवन्देवैर्वीरवत्स्तीर्णव्वेद्यामवर्धयत् ॥ वस्तोर्वृतम्प्राक्तो
र्भृतꣳरायाबर्हिष्मतोऽत्यगाद्वसुवने वसुधेयस्य वेतुयज ॥ १ ॥ देवीर्द्वार इन्द्रꣳ

सङ्ज्ञाते वीड्वीर्यामन्नवर्धयन् ॥ आवत्सेन तरुणेन कुमारेणं च मीवता पार्वाणꣳ
रेणुकंकाटन्नुदन्ताँव्वसुवनें वसुधेयंस्य व्यन्तु यजं ॥ २ ॥ देवी उषासा नक्ते
न्द्रँय्यज्ञे प्रयत्यंह्वेताम् ॥ दैवीर्विशः प्रायासिष्टाꣳ सुप्रीते सुधिते वसुवनें वसुधे
यंस्य वीताँय्यजं ॥ ३ ॥ देवी जोष्ट्री वसुधिती देवमिन्द्रंमवर्धताम् ॥ अयाव्य
न्याघा द्वेषाꣳस्यान्यावंक्षद्वसु वार्याणि यजमानाय शिक्षिते वंसुवनें वसुधेयंस्य
वीताँय्यजं ॥ ४ ॥ देवी ऊर्जाहुंती दुघें सुदुघे पयसेन्द्रंमवर्धताम् ॥ इषमूर्जमन्या
वंक्षत्सग्धिꣳ सपीतिमन्या नवेन पूर्वन्दयंमाने पुराणेन नवमधातामूर्जमूर्जाहुंती
ऊर्जयंमाने वसुवार्याणि यजमानाय शिक्षिते वंसुवनें वसुधेयंस्य वीताँय्यजं ॥५॥
देवा दैव्या होतारा देवमिन्द्रंमवर्धताम् ॥ हताघंशꣳसा आभार्ष्टांव्वसुवार्याणि
यजमानाय शिक्षितो वंसुवनें वसुधेयंस्य वीताँय्यजं ॥ ६ ॥ देवी स्तिस्रस्तिस्रो

देवीः पतिमिन्द्रंमवर्धयन् ॥ अस्पृंक्षद्भारती दिवंꣳ रुद्रैर्यज्ञꣳ सरंस्वतीळा वसुम
ती गृहान्वंसुवनें वसुधेयंस्य व्यन्तु यजं ॥ ७ ॥ देवइन्द्रो नराशꣳसंस्त्रि वरूथ
स्त्रिबन्धुरो देवमिन्द्रंमवर्धयत् ॥ शतेनं शितिपृष्ठानामाहिंतस्सहस्रेण प्रवर्तते मित्रा
वरुणेदंस्यहोत्रमर्हंतोबृहस्पतिस्तोत्रमाश्विनाध्वर्यंवँव्वसुवनें वसुधेयंस्यवेतुयजं ॥८॥
देवो देवैर्वनस्पतिर्हिरंण्यपर्णो मधुंशाखस्सुपिप्पलोदेवमिन्द्रंमवर्धयत् ॥ दिवम
ग्रेणास्पृक्षदान्तरिंक्षम्पृथिवीमंदृꣳहीद्वसुवनें वसुधेयंस्य वेतुयजं ॥ ९ ॥ देवम्ब
र्हिर्वारितीनान्देवमिन्द्रंमवर्धयत् ॥ स्वासस्थमिन्द्रेणासंन्नमन्या बर्हीꣳ ष्यभ्यंभू
द्वसुवनें वसुधेयंस्य वेतु यजं ॥ १० ॥ देवो अग्निस्स्विष्टकृद्देवमिन्द्रंमवर्धयत् ॥
स्विष्टङ्कुर्वन्स्विष्टकृत्स्विष्टमद्य करोतुनो वसुवनें वसुधेयंस्य वेतु यजं ॥ ११ ॥
अग्निमद्य होतारमवृणीतायँय्यजंमानः पचन्पक्तीः पचंन्पुरोळाशंम्बध्नान्निन्द्रायच्छा

गेम् ॥ सूपस्था अद्य देवो वनस्पतिरभवदिन्द्रायच्छागेन ॥ अघत्तम्मेदस्तः
प्रति पचताग्रभीदवीवृधत पुरोळाशेन ॥ त्वामद्यऋषे ॥ १२ ॥ २

होता यक्षत्समिधानम्महद्यशस्सुसमिद्धँव्वरेण्यमग्निमिन्द्रँव्वयो धसम् ॥
गायत्रीञ्छन्द इन्द्रियन्त्र्यविङ्गाँव्वयो दधद्वेत्वाज्यस्य होतर्यज ॥ १ ॥ होताय
क्षत्तनूनपातमुद्भिदँय्यङ्गर्भमदितिर्दधे शुचिमिन्द्रँव्वयोधसम् ॥ उष्णिहञ्छन्द
इन्द्रियन्दित्यवाहङ्गाँव्वयो दधद्वेत्वाज्यस्य होतर्यज ॥ २ ॥ होता यक्षदीळेन्य
मीळितँव्वृत्रहन्तमामिळाभिरीड्यꣳ सहस्सोममिन्द्रँव्वयो धसम् ॥ अनुष्टुभञ्छ
न्द इन्द्रियम्पञ्चाविङ्गाँव्वयो दधद्वेत्वाज्यस्य होतर्यज ॥ ३ ॥ होता यक्षत्सुब
र्हिषम्पूषण्वन्तममर्त्यꣳ सीदन्तम्बर्हिषि प्रियेऽमृतेन्द्रँव्वयोधसम् ॥ बृहतीञ्छ
न्द इन्द्रियन्त्रिवत्सङ्गाँव्वयो दधद्वे त्वाज्यस्य होतर्यज ॥ ४ ॥ होता यक्षद्व्य

चस्वतीस्सुप्रायणा ऋतावृधो द्वारो देवीर्हिरण्ययीर्ब्रह्माणमिन्द्रँव्वयोधसम् ॥ प
ङ्क्तिञ्छन्दइहेन्द्रियन्तुर्यवाहङ्गाँव्वयोदधद्व्यन्त्वाज्यस्य होतर्यज ॥ ५ ॥ होता
यक्षत्सुपेशसा सुशिल्पे बृहती उभेनक्तोषासान दर्शते विश्वमिन्द्रँव्वयोधसम् ॥
त्रिष्टुभञ्छन्द इहेन्द्रियम्पष्ठ वाहङ्गाँव्वयो दधद्वीतामाज्यस्य होतर्यज ॥ ६ ॥
होता यक्षत्प्रचेतसा देवानामुत्तमँय्यशो होतारा दैव्या कवी सयुजेन्द्रँव्वयोधस
म् ॥ जगतीञ्छन्द इन्द्रियमनड्वाहङ्गाँव्वयो दधद्वीतामाज्यस्य होतर्यज ॥ ७ ॥
होता यक्षत्पेशस्वतीस्तिस्रोदेवीर्हिरण्ययीर्भारतीर्बृहतीर्महीःपतिमिन्द्रँव्वयोधसम् ॥
विराजञ्छन्द इहेन्द्रियन्धेनुङ्गान्नवयो दधद्व्यन्त्वाज्यस्य होतर्यज ॥ ८ ॥ होता
यक्षत्सुरेतसन्त्वष्टारम्पुष्टिवर्धनꣳ रूपाणि बिभ्रतम्पृथक्पुष्टिमिन्द्रँव्वयोधसम् ॥
द्विपदञ्छन्द इन्द्रियमुक्षाणङ्गान्नवयो दधद्वे त्वाज्यस्य होतर्यज ॥ ९ ॥

होतायक्षद्वनस्पतिꣳ शमितारꣳ शतक्रतुꣳ हिरण्यपर्णमुक्थिनꣳ रशनाम्बि
भ्रतँव्वशिम्भगमिन्द्रँव्वयोधसम् ॥ ककुभञ्छन्द इहेन्द्रियँव्वशाँव्वेहतङ्गाँव्वयो
दधद्वेत्वाज्यस्य होतर्यज ॥ १० ॥ होतायक्षत्स्वाहा कृतीरग्निङ्गृहपतिम्पृथग्वरु
णम्भेषजङ्कविङ्क्षत्रमिन्द्रँव्वयोधसम् ॥अतिच्छन्दसञ्छन्द इन्द्रियम्बृहदृषभङ्गाँ
व्वयोदधद्वयन्त्वाज्यस्य होतर्यज ॥ ११ ॥ ३

देवम्बर्हिर्वयो धसन्देवमिन्द्रमवर्धयत् ॥ गायत्र्या च्छन्दसेन्द्रियञ्चक्षुरिन्द्रे
वयो दधद्वसुवने वसुधेयस्यवेतु यज ॥ १ ॥ देवीर्द्वारो वयोधसꣳ शुचिमिन्द्र
मवर्धयन् ॥ उष्णिहाच्छन्दसेन्द्रियम्प्राणमिन्द्रे वयो दधद्वसुवनेवसु धेयस्य व्य
न्तु यज ॥ २ ॥ देवी उषासा नक्ता देवमिन्द्रँव्वयो धसन्देवी देवमवर्धताम् ॥
अनुष्टुभाच्छन्दसेन्द्रियम्बलमिन्द्रे वयो दधद्वसुवने वसुधेयस्य वीताँय्यज ॥ ३ ॥

देवी जोष्ट्री वसुधिती देवमिन्द्रँव्वयोधसन्देवी देवमवर्धताम् ॥ बृहत्या च्छन्द
सेन्द्रियꣳश्रोत्रमिन्द्रेवयो दधद्वसुवने वसुधेयस्य वीताँय्यज ॥ ४ ॥ देवी ऊर्जा
हुती दुघे सुदुघे पयसेन्द्रँव्वयो धसन्देवी देवमवर्धताम् ॥ पङ्क्त्या च्छन्दसे
न्द्रियꣳ शुक्रमिन्द्रे वयो दधद्वसुवने वसुधेयस्य वीताँय्यज ॥ ५ ॥ देवा दैव्या
होतारा देवमिन्द्रँव्वयो धसन्देवौ देवमवर्धताम् ॥ त्रिष्टुभाच्छन्दसेन्द्रियन्त्वि
षिमिन्द्रे वयो दधद्वसुवने वसु धेयस्यवीताँय्यज ॥ ६ ॥ देवीस्तिस्रस्तिस्रो देवी
र्वयो धसम्पतिमिन्द्रमवर्धयन् ॥ जगत्या च्छन्दसेन्द्रियꣳ शूषमिन्द्रे वयो दध
द्वसुवने वसुधेयस्य व्यन्तु यज ॥ ७ ॥ देवो नराशꣳसो देवमिन्द्रँव्वयो धस
न्देवो देवमवर्धयत् ॥ विराजा च्छन्दसेन्द्रियꣳ रूपमिन्द्रे वयो दधद्वसुवने व
सुधेयस्य वेतु यज ॥ ८ ॥ देवो वनस्पतिर्देवमिन्द्रँव्वयो धसन्देवो देवमवर्ध

यत् ॥ द्विपदा च्छन्दसेन्द्रियम्भगमिन्द्रे वयो दधद्वसुवने वसुधेयस्य वेतु
यज ॥ ९ ॥ देवम्बर्हिर्वारितीनान्देवमिन्द्रँव्वयो धसन्देवन्देवमवर्धयत् ॥
ककुभा च्छन्दसेन्द्रियँय्यश इन्द्रे वयो दधद्वसुवने वसुधेयस्य वेतु यज ॥ १० ॥
देवो अग्निस्स्विष्टकृद्देवमिन्द्रँव्वयो धसन्देवो देवमवर्धयत् ॥ अतिच्छन्दसा
च्छन्दसेन्द्रियङ्क्षत्रमिन्द्रे वयो दधद्वसुवने वसुधेयस्य वेतु यज ॥ ११ ॥
अग्निमद्य होतारमवृणीतायँय्यजमानः पचन्पक्तीः पचन्पुरोळाशम्बध्नन्निन्द्राय
वयो धसे छागम् ॥ सूपस्था अद्यदेवो वनस्पतिरभवदिन्द्राय वयो धसे छागेन ॥
अघत्तम्मेदस्तःप्रति पचताग्रभीदवी वृधतपुरोळाशेन ॥ त्वामद्य ऋषे ॥ १२ ॥
४॥हरिः ॐ ॥

होतायक्षदेकादश ॥ ११ ॥ देवम्बर्हिर्द्वादश ॥ १२ ॥ होतायक्षदेकादश ॥११॥

देवम्बर्हिर्द्वादश ॥ १२ ॥ चतुरनुवाकेषु षट्चत्वारिंशत् ॥ ४६ ॥ प्राणाय
वाजस्य होतायज्जग्रतः षट्चत्वारिंशत् ॥ कारिकांतु प्रवक्ष्यामि जनानां हितका
म्यया ॥ आदावेतांच स्मृत्वाथ ब्रूयाद्येनं क्रमाद्बुधः ॥ १ ॥ होतायक्षत्समी हैवत
नूनपातमूतिभिः ॥ इळाभिर्बर्हिर्षीन्द्रश्चचतुर्णांवेतु विद्यते॥२॥ओजोव्यन्तुह्युषे दै
व्यानयोर्वीतां वदेत्सदा ॥ तिस्रो व्यन्तुच त्वष्टारं वनस्पतिंवेतु कथ्यते ॥ २ ॥
इंद्रव्यंत्विवितिचब्रूयादनुवाकेप्रथमे तथा ॥ अर्धर्चांद्वितीयेतु वक्ष्यते प्रथमंपदम्॥४॥
देवंबर्हिर्वस्तोर्वेतु देवीर्द्वारावत्सयोस्तथा ॥ व्यंत्वाथ देवी उषासा नक्तादेवीर्विश
स्ततः ॥ ५ ॥ देवीजोष्ट्र्यथ चायावीदेवीऊर्जाहुतीतथा ॥ इषमूर्जं चापिदेवा दै
व्याहताघशं सदा ॥६॥ चतुर्वीतामितिज्ञेयं देवीस्तिस्रोऽस्पृक्षदिह॥ देव इन्द्रश्श
तेनाथ देवोदेवैर्दिवंतथा ॥ ७ ॥ देवंबर्हिश्च स्वासस्थं देवोऽग्निस्विष्टकृत्तथा ॥ स्वि

ष्टकुर्वंश्च पंचानामेतासां वेतुसर्वदा ॥ ८ ॥ अग्निमद्य सुपस्थाश्चाघ
त्वामद्ययथाक्रमम् ॥ तृतीयेतु प्रवक्ष्यामि पुनरर्द्धर्चशःक्रमात् ॥ ९ ॥
होतायक्षत्समीहैव गायत्रींस्त्र्यवींततः ॥ तनूनपातमुष्णीहं दित्यवाहं यथाक्रमम्
॥ १० ॥ ईळेन्यंचानुष्टुभंतुसुपंचावीं सुबार्हिषम् ॥ बृहती त्रिवत्सांमध्येतु उक्त्वा वेतु
चतुस्त्रषु ॥ ११ ॥ व्यचस्वतीं पंक्तिंचाथ तुर्यवाहंच व्यंतुहि ॥ सुपेशसा त्रिष्टुभंच
पष्ठवाहसमंतथा ॥ १२ ॥ प्रचेतसाचजगतीमनड्वाहं तदुत्तरम् ॥ द्वयोर्वीतां चाधि
गम्य पेशस्वतीश्चसर्वदा ॥ १३ ॥ विराजव्यंतु धेनुंहि सुरेतसमथापिच ॥ द्विपदं
बोध्यमुक्षाणं वनस्पतिं ककुभंवशम् ॥ १४ ॥ तयोस्तु वेत्विहब्रूयात्स्वाहा कृतीर्य
थाक्रमम् ॥ व्यंत्वातिच्छन्दसंपूर्वमेवं ज्ञेयं तृतीयके ॥ १५ ॥ पुनरन्यं प्रवक्षामि
ह्यनुवाकं चतुर्थकम् ॥ देवं बर्हिश्च गायत्र्या चक्षुर्वेतु सदाबुधः ॥ १६ ॥ देवीर्द्वा

रस्तूष्णिहाच प्राणंव्यंतु वदेत्क्रमम् ॥ देव्युषासानुष्टुभाच बलंवीतां वदेत्स
दा ॥ १७ ॥ देवी जोष्ट्रीबृहत्याथश्रोत्रंवीतांच कथ्यते ॥ देवीऊर्जाहुती पंक्त्या
शुक्रंवीतां क्रमेणतु ॥ १८ ॥ देवादैव्याश्च वीतांतु त्रिष्टुभाथ त्विषीहतु ॥ देवी
स्तिस्त्रःपतिं व्यंतु जगत्याशूषमुत्तरे ॥ १९ ॥ देवो नराशंवेत्वाथविराजारूपमित्य
पि ॥ देवो वनस्पतिर्वेतु द्विपदांचभगंस्मृतम् ॥ २० ॥ देवंबर्हिश्च ककुभा यशो
वेति क्रमेणच ॥ देवोऽग्निरतिच्छन्दसाक्षत्रं वेतुनित्यशः ॥ २१ ॥ अग्निमद्यसुप
स्थाश्चाघत्तात्त्वामृच एवहि ॥ एवं विंशतिमेऽध्यायेऽनुवाकेषु चतुस्त्रषु ॥ २२ ॥
यःस्मरेत्कारिकांप्रेक्ष्यवारंवारं बुधोयदा ॥ सनरो निश्चलोभूत्वा वक्तुं शक्नोतिसर्व
दा ॥ ॥ इति शुक्लयजुर्वेद काण्व संहितापाठे विंशतिमोऽध्यायः ॥ हरिः ॐ

हरिःॐ ॥ समिद्धो अञ्जन्कृदरम्मतीनाङ्घृतमग्ने मधुमत्पिन्वमानः ॥ वाजी व
हन्वाजिनञ्जातवेदो देवानाँव्वक्षि प्रियमा सधस्थम् ॥ १ ॥ घृतेनाञ्जन्त्सम्पथो
देवयानाम्प्रजानन्वाज्यप्येतु देवान् ॥ अनु त्वा सप्ते प्रदिशस्सचन्ताᳫ स्वधामस्मै
यजमानाय धेहि ॥ २ ॥ ईड्यश्चासि वन्द्यश्च वाजिन्नाशुश्चासि मेध्यश्च सप्ते ॥
अग्निष्ट्वा देवैर्वसुभिस्सजोषाःप्रीतँव्वह्निँव्वहतु जातवेदाः ॥ ३ ॥ स्तीर्णम्बर्हिस्सुष्ट
रीमा जुषाणोरु पृथुप्रथमानम्पृथिव्याम् ॥ देवेभिर्युक्तमदितिस्सजोषास्स्योनङ्कृ
ण्वाना सुविते दधातु ॥ ४ ॥ एता उवस्सुभगा विश्वरूपा विपक्षोभिश्श्रय
माणा उदातैः ॥ ऋष्वास्सतीः कवषश्शुम्भमाना द्वारो देवीस्सुप्रायणा भव
न्तु ॥ ५ ॥ अन्तरा मित्रावरुणा चरन्ती मुखँय्यज्ञानामभि सँव्विदाने ॥ उ
षासा वाᳫसुहिरण्ये सुशिल्पे ऋतस्य योना इह सादयामि ॥ ६ ॥ प्रथमा वाᳫ

सरथिना सुवर्णी देवौ पश्यन्तौ भुवनानि विश्वा ॥ अपिप्रयश्चोदनावाम्मिमा
ना होतारा ज्योतिः प्रदिशा दिशन्ता ॥ ७ ॥ आदित्यै नो भारती वष्टु यज्ञꣳ
सरस्वती सह रुद्रैर्न आवीत् ॥ इळोपहूता वसुभिस्सजोषा यज्ञन्नो देवीरमृतेे
षु धत्त ॥ ८ ॥ त्वष्टा वीरन्देवकामञ्जजान त्वष्टुरर्वा जायत आशुरश्वः ॥
त्वष्टेदँ व्विश्वम्भुवनञ्जजान बहोः कर्तारमिह यक्षिहोत : ॥ ९ ॥ अश्वो घृते
न त्मन्यासमक्त उप देवाँऋतुशः पाथ एतु ॥ वनस्पतिर्देवलोकम्प्रजानन्नग्नि
नाहव्या स्वदितानि वक्षत् ॥ १० ॥ प्रजापतेस्तपसा वावृधानस्सद्यो जातो दधि
षे यज्ञमग्ने ॥ स्वाहा कृतेन हविषापुरोगा याहिसाध्या हविरदन्तुदेवाः ॥११॥ १
केतुङ्कृण्वन्नकेतवे पेशो मर्या अपेशसे ॥ समुषद्भिरजायथाः ॥ १ ॥ जीमूत
स्येव भवति प्रतीकँय्यद्वर्मी याति समदामुपस्थे ॥ अनाविद्धया तन्वा जयत्वꣳ
व्वसवो निरतष्ट ॥ २ ॥ असि यमो अस्यादित्यो अर्वन्नसि त्रितो गुह्येन व्रते
न ॥ असि सोमेन समया विपृक्त आहुस्ते त्रीणिदिवि बन्धनानि ॥ ३ ॥
त्रीणि त आहुर्दिवि बन्धनानि त्रीण्यप्सुत्रीण्यन्तस्समुद्रे ॥ उतेवमे वरुणश्छ
न्त्स्यर्वन्यत्रा त आहुःपरमञ्जनित्रम् ॥ ४ ॥ इमा ते वाजिन्नव मार्जनानीमा
शफानाꣳ सनितुर्निधाना ॥ अत्रा ते भद्रा रशना अपश्यमृतस्ययया अभिरक्ष
न्ति गोपाः ॥ ५ ॥ आत्मानन्ते मनसारादजानामवो दिवा पतयन्तम्पतङ्गम् ॥
शिरो अपश्यम्पथिभिस्सुगेभिररेणुभिर्जेहमानम्पतात्रि ॥ ६ ॥ अत्रा ते रूपमुत्त
ममपश्यञ्जिगीषमाणमिष आ पदे गोः ॥ यदा ते मर्तो अनु भोगमानळा
दिद्ग्रसिष्ठ ओषधीरजीगः ॥ ७ ॥ अनु त्वा रथो अनु मर्यो अर्वन्ननु गावोऽ
नुभगः कनीनाम् ॥ अनु व्राता सस्तव सख्यमीयुरनुदेवा ममिरे वीर्यन्ते ॥ ८ ॥

हिरण्यशृङ्गोऽयो अस्य पादा मनो जवा अवर इन्द्र आसीत् ॥ देवा इदस्य
हविरद्यमायन्यो अर्वन्तम्प्रथमो अध्यतिष्ठत् ॥ ९ ॥ ईर्मान्ता सस्सिलिकमध्य
मासस्सꣳशूरणासो दिव्यासो अत्याः ॥ हꣳसा इव श्रेणिशो यतन्ते यदाक्षि
षुर्दिव्यमज्ममश्वाः ॥ १० ॥ तव शरीरम्पतयिष्णर्वन्तव चित्तँव्वात इव ध्र
जीमान् ॥ तव शृङ्गाणि विष्ठिता पुरुत्रारण्येषु जर्भुराणाचरन्ति ॥ ११ ॥ उप
प्रागाच्छसनँव्वाज्यर्वा देवद्रीचा मनसा दीध्यानः ॥ अजःपुरोनीयते नाभिर
स्यानु पश्चात्कवयो यन्तिरेभाः ॥ १२ ॥ उप प्रागात्परमँय्यत्सधस्थमर्वाँ२अ
च्छा पितरम्मातरञ्च ॥ अद्या देवाञ्जुष्टतमो हि गम्या अथाशास्ते दाशुषे
वार्याणि ॥ १३ ॥ ३ ॥

समिद्धो अद्य मनुषो दुरोणे देवो देवान्यजसि जातवेदः ॥ आच वह मित्र
महश्चिकित्वान्त्वन्दूतः कविरसि प्रचेताः ॥ १ ॥ तनूनपात्पथ ऋतस्य यानान्म
ध्वा समञ्जन्त्स्वदयासुजिह्व ॥ मन्मानि धीभिरुत यज्ञमृन्धन्देवत्राचकृणुह्यध्वर
न्नः ॥ २ ॥ नराशꣳसस्य महिमानमेषामुप स्तोषाम यजतस्य यज्ञैः ॥ ये सुक्र
तवश्शुचयो धियन्धास्स्वदन्तिदेवा उभयानि हव्या ॥ ३ ॥ आजुह्वान ईड्यो
वन्द्यश्चाया ह्यग्ने वसुभिस्सजोषाः ॥ त्वन्देवानामसि यह्व होता स एनान्यक्षी
षितो यजीयान् ॥ ४ ॥ प्राचीनम्बर्हिः प्रदिशा पृथिव्या वस्तो रस्या वृज्यते
अग्रे अह्नाम् ॥ व्युप्रथते वितरँव्वरीयो देवेभ्यो अदितये स्योनम् ॥ ५ ॥
देवीर्द्वारो बृह
व्यचस्वतीरुर्विया विश्रयन्ताम्पतिभ्यो नजनयश्शुम्भमानाः ॥ देवीर्द्वारो बृह
तीर्विश्वमिन्वा देवेभ्यो भवत सुप्रायणाः ॥ ६ ॥ आसुष्वयन्ती यजते उपाके
उषासानक्ता सदतान्नियोनौ ॥ दिव्ये योषणे बृहती सुरुक्मे अधिश्रियꣳशुक्र

पिशन्दधाने ॥ ७ ॥ दैव्या होतारा प्रथमा सुवाचामिमाना यज्ञम्मनुषो यजं
ध्यै ॥ प्रचोदयन्ता विदथेषु कारूप्राचीनञ्ज्योतिः प्रदिशा दिशन्ता ॥ ८ ॥
आनो यज्ञम्भारती तूयमेत्विळा मनुष्वदिह चेतयन्ती ॥ तिस्रो देवीर्बि
र्हिरेदꣳ स्योनꣳ सरस्वती स्वपसस्सदन्तु ॥ ९ ॥ यइमे द्यावापृथिवी
जनित्री रूपैरपिꣳ शद्भुवनानि विश्वा ॥ तमद्य होतरिषितो यजीयान्दे
वन्त्वष्टारमिह यक्षिविद्वान् ॥ १० ॥ उपावसृज त्मन्या समञ्जन्देवा
नाम्पाथ ऋतुथा हवीꣳषि ॥ वनस्पतिश्शमिता देवो अग्निस्स्वदन्तु हव्यम्मधु
ना घृतेन ॥ ११ ॥ सद्यो जातो व्यमिमीत यज्ञमग्निर्देवानामभवत्पुरोगाः ॥ अ
स्यहोतुः प्रदिश्यृतस्यवाचिस्वाहा कृतꣳहविरदन्तुदेवाः ॥ १२ ॥ ४

अग्नये गायत्राय त्रिवृते राथन्तरायाष्टाकपाल इन्द्राय त्रैष्टुभाय पञ्चदशायबा
र्हतायैकादशकपालो विश्वेभ्यो देवेभ्यो जागतेभ्यस्सप्तदशेभ्यो वैरूपेभ्यो द्वाद
शकपालो मित्रावरुणाभ्यामानुष्टुभाभ्यामेकविꣳशाभ्याँव्वैराजाभ्याम् ॥ पयस्या
बृहस्पतये पाङ्क्ताय त्रिणवाय शाक्कराय चरुस्सवित्र औष्णिहाय त्रयस्त्रिꣳशाय
रैवताय द्वादशकपालःप्राजापत्यश्चरुरदित्यै विष्णुपत्न्यै चरुरग्नये वैश्वानराय द्वा
दशकपालोऽनुमत्या अष्टाकपालः ॥ १ ॥ ५

आग्नेयःकृष्णग्रीवस्सारस्वती मेषी बभ्रुस्सौम्यः पौष्णश्श्यामः शितिपृष्ठो बार्ह
स्पत्यःशिल्पोवैश्वदेवः ॥ ऐन्द्रोऽरुणो मारुतः कल्माष ऐन्द्राग्नस्सꣳहितोऽधोरा
मस्सावित्रो वारुणः कृष्ण एकशितिपात्पेत्वः ॥ १ ॥ ६

अग्नयेऽनीकवते रोहिताञ्जिरनड्वानधोरा मौसावित्रौ पौष्णौरजतनाभी वैश्व
देवौ पिशङ्गौतूपरौ ॥ मारुतः कल्माष आग्नेयः कृष्णोऽजस्सारस्वतीमेषीवारुणः

पेत्वः ॥ १ ॥ ७ ॥ हरिःॐ ॥

समिद्धोअञ्जन्नेकादश ॥ ११ ॥ केतुङ्कृण्वन्द्वादश ॥ १२ ॥ यदक्रन्दस्त्रयोद
श ॥ १३ ॥ समिद्धोअद्यद्वादश ॥ १२ ॥ अग्नयेगायत्राय ॥ १ ॥ आग्नेयःकृष्णग्री
वः ॥ १ ॥ अग्नयेऽनीकवतइत्येकैका ॥ १ ॥ सप्तानुवाकेष्वेकपञ्चाशत् ॥ ५१ ॥
इतिशुक्लयजुर्वेदकाण्वसँहितापाठेएकत्रिंशतिमोऽध्यायः ॥ हरिःॐ ॥

हरिःॐ ॥ अस्याजरासो दमामरित्रा अर्चद्धूमासो अग्नयःपावकाः ॥ श्विती
चयः श्वात्रासो भुरण्यवो वनर्षदो वायवो नसोमाः ॥ १ ॥ हरयो धूमकेतवो
वातजूता उपद्यवि॥यतन्ते वृथगग्नयः ॥ २ ॥ यजानो मित्रावरुणा यजा देवाँ२
ऋतम्बृहत् ॥ अग्ने यक्षि स्वन्दमम् ॥ ३ ॥ युक्ष्वाहि देवहूतमाँ२अश्वाँ२अग्ने रथी
रिव ॥ निहोता पूर्व्यस्सदः ॥ ४ ॥ द्वे विरूपे चरतस्स्वर्थे अन्यान्या वत्समुपधा

पयेते ॥ हरिरन्यस्याम्भवति स्वधावाञ्छुक्रो अन्यस्यान्ददृशे सुवर्चाः ॥ ५ ॥ अ
यमिह प्रथमो धायि धातृभिर्होता यजिष्ठो अध्वरेष्वीड्यः ॥ यमप्नवानो भृगवो
विरुरुचुर्वनेषु चित्रँविभ्वँविशेविशे ॥ ६ ॥ त्रीणि शतात्रीसहस्राण्यग्निन्त्रिꣳ श
च्चदेवा नवचासपर्यन् ॥ औक्षन्घृतैरस्तृणन्बर्हिरस्मा आदिद्धोतारन्य सादय
न्त ॥ ७ ॥ मूर्धानन्दिवो अरतिम्पृथिव्या वैश्वानरमृत आजातमग्निम् ॥ कविꣳ
सम्राजमतिथिञ्जनानामासन्नापात्रञ्जनयन्त देवाः ॥ ८ ॥ अग्निर्वृत्राणि जङ्घनद्
द्रविणस्युर्विपन्यया ॥ समिद्धःशुक्रआहुतः ॥ ९ ॥ विश्वेभिस्सोम्यम्मध्वग्न इन्द्रे
ण वायुना ॥ पिबा मित्रस्य धामभिः ॥ १० ॥ आयदिषे नृपतिन्तेजआनट्शु
चिरेतो निषिक्तन्द्यौरभीके ॥ अग्निश्शर्धमनवद्यँय्युवानꣳ स्वाध्यञ्जनयत्सूदय
च्च ॥ ११ ॥ अग्ने शर्धमहते सौभगाय तवद्युम्नान्युत्तमानि सन्तु ॥ सञ्जास्पत्यꣳ

सुयममाकृणुष्व शत्रूयतामभितिष्ठा महाꣳसि ॥ १२ ॥ त्वाꣳ हिमन्द्रतंममर्कशो
केर्वैवृमहे महिनःश्रोष्यंग्ने ॥ इन्द्रन्नत्वा शवसा देवता वायुम्पृणन्ति राधसान्नृत
माः ॥ १३ ॥ त्वेअग्ने स्वाहुत प्रियासंस्सन्तु सूरयः ॥ यन्ता रोये मघवानो ज
नाना मूर्वान्दयन्त गोनाम् ॥ १४ ॥ श्रुधि श्रुत्कर्ण वह्निभिर्देवैरग्नेसयावभिः ॥
आसीदन्तु बर्हिषि मित्रो अर्यमा प्रातर्यावाणो अध्वरम् ॥ १५ ॥ विश्वेषामदि
तिर्यज्ञियानाँव्विश्वेषामतिथिर्मानुषाणाम् ॥ अग्निर्देवानामव आवृणानस्सुमृळी
को भवतु जातवेदाः ॥ १६ ॥ महो अग्नेस्समिधानस्य शर्मण्यनागा मित्रे वरुणे
स्वस्तये ॥ श्रेष्ठेस्याम सवितुस्सवीमनि तद्देवानामवो अद्यावृणीमहे ॥ १७ ॥ १
आपश्चित्पिप्युस्तर्योन गावो नक्षन्नृतञ्जरिता रस्त इन्द्र ॥ याहि वायुर्न नि
युतो नो अच्छात्वꣳ हिधीभिर्दयसे विवाजान् ॥ १ ॥ गाव उपावतावतम्मही य

ज्ञस्यरप्सुदा ॥ उभाकर्णा हिरण्यया ॥ २ ॥ यदद्य सूर उदितेऽनागा मित्रो अर्य
मा ॥ सुवातिसविता भगः ॥ ३ ॥ आसुते सिञ्चत श्रियꣳ रोदस्योरभिश्रियम् ॥
रसादधीत वृषभम् ॥ तम्प्रत्नथायँव्वेनश्चोदयत् ॥ ४ ॥ आतिष्ठन्तम्परि विश्वे अ
भूषञ्छ्रियो वसानश्चरति स्वरोचिः ॥ महत्तद्वृष्णो असुरस्य नामाविश्वरूपो अमृ
तानि तस्थौ ॥ ५ ॥ प्रवो महे मन्दमानायान्धसोऽर्चाविश्वानराय विश्वाभुवे ॥
इन्द्रस्य यस्य सुमखꣳ सहोमहिश्रवो नृम्णञ्चरोदसी सपर्यतः ॥ ६ ॥ बृहन्निदि
ध्मएषाम्भूरि शस्तम्पृथुस्वरुः ॥ येषामिन्द्रो युवासखा ॥ ७ ॥ इन्द्रेहि मत्स्यन्ध
सोविश्वेभिस्सोमपर्वभिः ॥ महाँ२अभिष्टिरोजसा ॥ ८ ॥ इन्द्रोवृत्रमवृणोच्छर्द्धनी
तिःप्रमायिनाममिनाद्वर्पणीतिः ॥ अहन्व्यꣳ समुशधग्वनेष्वाविर्धेना अकृणोद्रा
म्याणाम् ॥ ९ ॥ कुतस्त्वमिन्द्रमाहिनस्सन्नेको यासि सत्पते किन्तइत्था ॥ सम्पृ

च्छसे समराणःशुंभानैर्वोचेस्तन्नो हरिवो यत्तेअस्मे ॥ महाँ२इन्द्रोय ओजसा क
दाचनस्तरीरसि कदाचन प्रयुच्छसि ॥ १० ॥ आतत्त इन्द्रा यवःपनन्ताभिय ऊ
र्वङ्गोमन्तन्तितृत्सान् ॥ सकृत्स्वँय्ये पुरुपुत्ताम्महीँ सहस्रधाराम्बृहतीन्दुदुक्ष
न् ॥ ११ ॥ इमान्ते धियम्प्रभरे महो महीमस्य स्तोत्रे धिषणा यत्तआनजे ॥
तमुत्सवेच प्रसवेच सासहिमिन्द्रन्देवासश्शवसामदन्ननु ॥ १२ ॥ २

विभ्राड्बृहत्पिबतु सोम्यम्मध्वायुर्दधद्यज्ञपता अविह्रुतम् ॥ वातजूतो यो अ
भिरक्षतित्मना प्रजाःपुपोष पुरुधा विराजति ॥ १ ॥ उदुत्यञ्जातवेदसन्देवँव्वह
न्ति केतवः ॥ दृशे विश्वाय सूर्यम् ॥ २ ॥ येना पावक चक्षसा भुरण्यन्तञ्ज
नाँ२अनु ॥ त्वँव्वरुण पश्यसि ॥ ३ ॥ दैव्या अध्वर्यू आगतँ रथेन सूर्यत्वचा॥
मध्वा यज्ञँ समञ्जाथे ॥ तम्प्रत्नथायँव्वेनश्चित्रन्देवानाम् ॥ ४ ॥ आन

इळाभिर्विदथेसुशस्ति विश्वानरस्सविता देव एतु ॥ अपियथा युवानो मत्सथा
नो विश्वञ्जगदभि पित्वे मनीषा ॥ ५ ॥ यद्य कच्चवृत्रहन्नुदगाअभि सूर्य ॥
सर्वन्तदिन्द्र तेवशे ॥ ६ ॥ तरणिर्विश्वदर्शतो ज्योतिष्कृदसि सूर्य ॥ विश्वमा
भासि रोचनम् ॥ ७ ॥ तत्सूर्यस्य देवत्वन्तन्महित्वम्मध्या कर्तोर्विततँ सञ्जभा
र ॥ यदेदयुक्त हरितस्सधस्थादाद्रात्रीवासस्तनुते सिमस्मै ॥ ८ ॥ तन्मित्रस्य
वरुणस्याभिचक्षे सूर्यो रूपङ्कृणुते द्योरुपस्थे ॥ अनन्तमन्यद्रुशदस्य पाजः कृ
ष्णमन्यद्धरितस्सम्भरन्ति ॥ ९ ॥ बण्महाँ२असि सूर्यबळादित्य महाँ२असि ॥
महस्ते सतो महिमा पनस्यतेऽद्धादेव महाँ२असि ॥ १० ॥ बट्सूर्य श्रवसा म
हाँ२असि सत्रा देव महाँ२असि ॥ मह्ना देवानामसुर्यः पुरोहितो विभुज्योतिर
दाभ्यम् ॥ ११ ॥ श्रायन्त इव सूर्यव्विश्वेदिन्द्रस्य भक्षत ॥ वसूनि जाते जन

मान ओजसा प्रतिभागन्नदीधिम ॥ १२ ॥ अद्या देवा उदिता सूर्यस्य निरꣳहं
सः पिपृता निरवद्यात् ॥ तन्नो मित्रो वरुणो मामहन्तामदितिस्सिन्धुः पृथिवी
उतद्यौः ॥ १३ ॥ आकृष्णेन रजसा वर्तमानो निवेशयन्नमृतम्मर्त्यञ्च ॥ हिरण्य
येन सविता रथेना देवो याति भुवनानि पश्यन् ॥ १४ ॥ ३

प्रवांवृजे सुप्रया बर्हिरेषामा विश्पतीवबीरिट इयाते ॥ विशामक्तोरुषसः पूर्व
हूतौ वायुः पूषास्वस्तये नियुत्वान् ॥१॥ इन्द्रवायू बृहस्पतिम्मित्राग्निम्पूषणम्भ
गम् ॥ आदित्यान्मारुतङ्गणम् ॥२॥ वरुणःप्राविता भुवन्मित्रो विश्वाभिरूतिभिः ॥
करतान्नस्सुराधसः ॥ ३ ॥ अधिन इन्द्रैषाँव्विष्णो सजात्यानाम् ॥ इतामरुतोअ
श्विना ॥ तम्प्रत्नथायँव्वेनश्चोदयद्येदेवास आन इळाभिर्विश्वेभिस्सोम्यम्मध्वो
मासश्चर्षणीधृतः ॥ ४ ॥ अग्न इन्द्र वरुण मित्र देवाश्शर्द्धः प्रयन्त मारुतोत

विष्णो ॥ उभा नासत्या रुद्रो अधग्नाःपूषाभगस्सरस्वती जुषन्त ॥ ५ ॥ इन्द्राग्नी
मित्रावरुणादितिꣳ स्वः पृथिवीन्द्याम्मरुतःपर्वताँ२अपः ॥ हुवे विष्णुम्पूषणम्ब्रह्म
णस्पतिम्भगन्नुशꣳ सꣳ सवितारमूतये ॥ ६ ॥ अस्मे रुद्रा मेहना पर्वतासो वृत्र
हत्ये भरहूतौ सजोषाः ॥ यश्शꣳसते स्तुवते धायि पज्र इन्द्र ज्येष्ठा अस्माँ२अ
वन्तु देवाः ॥७॥ अर्वाञ्चो अद्या भवता यजत्रा आवो हार्दिभयमानोव्ययेयम् ॥
त्राध्वन्नो देवा निजुरो वृकस्य त्राध्वङ्कर्तादवपदो यजत्राः ॥ ८ ॥ विश्वे अद्य म
रुतो विश्व ऊती विश्वे भवन्त्वग्नयस्समिद्धाः ॥ विश्वेनो देवा अवसागमन्तु वि
श्वमस्तुद्रविणँव्वाजो अस्मे ॥ ९ ॥ विश्वे देवाः शृणुतेमꣳ हवम्मेये अन्तरिक्षे य
उपद्यविष्ठ ॥ ये अग्निजिह्वा उतवा यजत्रा आसद्यास्मिन्बर्हिषि मादयध्वम् ॥१०॥
देवेभ्योहि प्रथमँय्यज्ञियेभ्योऽमृतत्वꣳ सुवसि भागमुत्तमम् ॥ आदिद्दामानꣳ स

वितर्व्वूर्णुषे नूचीनाजीविता मानुषेभ्यः ॥ ११ ॥ ४

प्रवायुमच्छा बृहती मनीषा बृहद्रयिंव्विश्ववारꣳ रथप्राम् ॥ द्युत द्यामानियु
तः पत्यमानः कविः कविमियक्षसि प्रयज्यो ॥ १ ॥ इन्द्रवायू इमे सुताउपप्रयो
भिरागतम् ॥ इन्दवोवा मुशन्तिहि ॥ २ ॥ मित्रꣳ हुवे पूतदक्षँव्वरुणञ्चरिशाद
सम् ॥ धियङ्घृताचीꣳ साधन्ता ॥ ३ ॥ दस्रा युवाकवस्सुता नासत्या वृक्तबर्हि
षः ॥ आयातꣳ रुद्रवर्तनी ॥ तम्प्रत्नथायँव्वेनश्चोदयत् ॥ ४ ॥ विदद्यदी सरमा
रुग्णमद्रेर्महि पाथः पूर्व्यꣳ सध्र्यक्कः ॥ अग्रन्नयत्सुपद्यक्षराणा मच्छारवम्प्रथमा
जानतीगात् ॥ ५ ॥ नहि स्पशमविदन्नन्यमस्माद्वैश्वानरात्पुर एतारमग्नेः ॥ एमे
नमवृधन्नमृता अमर्त्यँव्वैश्वानरङ्क्षैत्रजित्याय देवाः ॥ ६ ॥ उग्रा विघनिना मृ
धइन्द्राग्नी हवामहे ॥ तानो मृळात ईदृशे ॥ ७ ॥ उपास्मै गायता नरः पवमा
नायेन्दवे ॥ अभिदेवाँ२इयक्षते ॥ ८ ॥ ये त्वाहिहत्ये मघवन्नवर्धन्ये शाम्बरे ह
रिवो ये गइष्टौ ॥ येत्वा नूनमनुमदन्ति विप्राः पिबेन्द्र सोमꣳ सगणो मरुद्भिः
॥ ९ ॥ जनिष्ठा उग्रस्सहसे तुराय मन्द्र ओजिष्ठो बहुलाभिमानः ॥ अवर्धन्निन्द्रं
म्मरुतश्चिदत्र माता यद्वीरन्दधनद्धनिष्ठा ॥ १० ॥ आतूनं इन्द्र वृत्रहन्नस्माकम
र्धमागहि ॥ महान्महीभिरूतिभिः ॥ ११ ॥ त्वमिन्द्र प्रतूर्तिष्वभि विश्वा असि
स्पृधः ॥ अशस्तिहा जनिता विश्वतूरसि त्वन्तूर्य तरुष्यतः ॥ १२ ॥ अनुते शु
ष्मन्तुरयन्तमीयतुःक्षोणी शिशुन्नमातरा ॥ विश्वास्ते स्पृधः श्नथयन्त मन्यवेवृत्रँ
य्यदिन्द्र तूर्वसि ॥ १३ ॥ यज्ञो देवानाम्प्रत्येति सुम्नमादित्यासो भवता मृळय
न्तः ॥ आवोऽर्वाची सुमतिर्ववृत्यादꣳहोश्चिद्या वरिवो वित्तरासत् ॥१४॥ अदब्धे
भिस्सवितःपायुभिष्ट्वꣳ शिवेभिरद्य परिपाहिनो गयम् ॥ हिरण्यजिह्वस्सुविताय

नव्यसे रक्षा माकिर्नो अघशꣳ सईशत ॥ १५ ॥ ५

प्रवीरया शुचयो दद्रिरेवामध्वर्युभिर्मधु मन्तस्सुतासः ॥ वह वायो नियुतो
याह्यच्छा पिबा सुतस्यान्धसो मदाय ॥ ॥ १ ॥ गाव उपावतावतम्महो यज्ञस्य
रप्सुदा ॥ उभा कर्णा हिरण्यया ॥२॥ काव्ययोराजानेषु क्रत्वा दक्षस्य दुरोणे ॥
रिशादसा सधस्थआ ॥ ३ ॥ दैव्या अध्वर्यू आगतꣳ रथेन सूर्यत्वचा ॥ मध्वा
यज्ञꣳ समञ्जाथे ॥ तम्प्रत्नथायँव्वेनश्चोदयत् ॥४॥ तिरश्चीनो विततो रश्मिरेषा
मधस्स्विदासी३दुपरिस्विदासी३त्॥ रेतोधा आसन्महिमान आसन्त्स्वधा अवस्ता
त्प्रयतिः परस्तात् ॥ ५ ॥ आरोदसी अपृणदा स्वर्महज्जातँयदेनमपसो अधार
यन् ॥ सोअध्वराय परिणीयते कविरत्योन वाजसातये चनोहितः ॥ ६ ॥ उक्थे
भिर्वृत्रहन्त माया मन्दाना चिदा गिरा ॥ आङ्गूषैराविवासतः ॥ ७ ॥ उपन

स्सूनवो गिरःश्रृण्वन्त्वमृतस्ययो ॥ सुमृळीका भवन्तुनः ॥ ८ ॥ ब्रह्माणि मेमत
यश्शꣳ सुतासःशुष्म इयर्ति प्रभृतो मेअद्रिः ॥ आशासते प्रतिहर्यन्त्युक्थेमाहरी
वहतस्ता नोअच्छ ॥ ९ ॥ अनुत्तमाते मघवन्न किर्नुनत्वा वाँ२अस्ति देवतावि
दानः ॥ नजायमानो नशतेन जातो यानि करिष्या कृणुहि प्रवृद्ध ॥ ॥ १० ॥
तदिदास भुवनेषु ज्येष्ठँय्यतो जज्ञउग्रस्त्वेष नृम्णः ॥ सद्यो जज्ञानो निरिणाति
शत्रूननुयँव्विश्वे मदन्त्यूमाः ॥११॥ इमा उत्वा पुरूवसो गिरो वर्धन्तु यामम ॥
पावकवर्णाः शुचयो विपश्चितोऽभिस्तोमैरनूषत ॥ १२ ॥ यस्यायँव्विश्व आर्यो
दासःशेवधिपा अरिः ॥ तिरश्चिदर्ये रुशमे पवीरवि तुभ्येत्सो अज्यतेरयिः ॥१३॥
अयꣳ सहस्रमृषिभिस्सहस्कृतस्समुद्र इव पप्रथे ॥ सत्यस्सो अस्य महिमा गृणे
शवो यज्ञेषु विप्रराज्ये ॥ १४ ॥ अदब्धेभिस्सवितः पायुभिष्ट्वꣳ शिवेभिरद्यपरि

पाहिनो गर्यम् ॥ हिरण्यजिह्वस्सुविताय नव्यसे रक्षामाकिर्नो अघशꣳ सईश
त ॥ १५ ॥ ६ ॥ हरिःॐ ॥

अस्याजरासस्सप्तदश ॥ १७॥ आपश्चिद्द्वादश ॥१२॥ विभ्राद्चतुर्दश ॥१४॥
प्रवावृजएकादश ॥ ११ ॥ प्रवायुम्पञ्चदश ॥ १५ ॥ प्रवीरयेतिच ॥ १५ ॥ षडनु
वाकेषुचतुरशीतिः ॥ ८४ ॥ इतिशुक्लयजुर्वेदकाण्वसँहितापाठेद्वात्रिंशतिमोऽध्या
यः ॥ हरिःॐ ॥

हरिःॐ ॥ यज्जाग्रतो दूरमुदैति दैवन्तदु सुप्तस्य तथैवैति ॥ दूरङ्गमञ्ज्योति
षाञ्ज्योतिरेकन्तन्मे मनश्शिवसङ्कल्पमस्तु ॥ १ ॥ पितुन्नुस्तोषम्महो धर्माणन्त
विषीम् ॥ यस्य त्रितो व्योजसा वृत्राँव्विपर्वमर्दयत् ॥२॥ अन्विदनुमते त्वम्मन्या
सैशञ्च नस्कृधि ॥ क्रत्वे दक्षाय नोहिनु प्रणआयूꣳषितारिषः ॥ ३ ॥ सिनीवा

लि पृथुष्टुके यादेवानामसि स्वसा ॥ जुषस्व हव्यमाहुतम्प्रजान्देविदिदिड्ढिनः
॥ ४ ॥ पञ्च नद्यस्सरस्वतीमपियन्ति सस्रोतसः ॥ सरस्वती तुपञ्चधासो देशेऽ
भवत्सरित् ॥ ५ ॥ त्वमग्ने प्रथमो अङ्गिराऋषिर्देवोदेवानामभवश्शिवस्सखा॥तव
व्रते कवयो विद्मनापसोऽजायन्त मरुतो भ्राजदृष्टयः ॥ ६ ॥ त्वन्नोअग्ने तवदेव
पायुभिर्मघोनो रक्षतन्वश्च वन्द्य ॥ त्राता तोकस्य तनये गवामस्यनिमेषꣳ रक्ष
माणस्तव व्रते ॥ ७ ॥ उत्तानायामवभरा चिकित्वान्त्सद्यःप्रवीतावृषणञ्जजान ॥
अरुषस्तूपोरुशदस्य पाज इळायास्पुत्रो वयुनेऽजनिष्ट ॥ ८ ॥ इळायास्त्वा पदेव
यन्नाभा पृथिव्या अधि ॥ जातवेदो निधीमह्यग्ने हव्याय वोह्ळवे ॥ ९ ॥ प्रमन्म
हेशवसानाय शूषमाङ्गूषङ्गिर्वणसे अङ्गिरस्वत् ॥ सुवृक्तिभिस्तुवत ऋग्मियाया
र्चामार्कन्नरे विश्रुताय ॥ १० ॥ प्रवो महे महिनमो भरध्वमाङ्गूष्यꣳ शवसाना

यसामं ॥ येनांनःपूर्वें पितरंः पदज्ञा अर्चन्तो अङ्गिरसोगा अविंन्दन् ॥ ११ ॥ इ
च्छान्तिंत्वा सोम्यासस्सखांयस्सुन्वन्ति सोमन्दधांति प्रयांꣳसि ॥ तितिंक्षन्ते अ
भिशंस्तिञ्जनांनामिन्द्र त्वदा कश्चन हिप्रंकेतः ॥ १२ ॥ नतें दूरे पंरमा
चिद्रजाꣳस्या तु प्रयांहि हरिवो हरिंभ्याम् ॥ स्थिराय वृष्णे सवंना
कृते मा युक्ता ग्रावांणस्समिधाने अग्नौ ॥ १३ ॥ अषांह्ळँय्युत्सु
पृतंना सुपप्रिꣳ स्वर्षामप्साँव्वृजनंस्य गोपाम् ॥ भरेषुजाꣳ सुक्षितिꣳ सुश्र
वंसञ्जयंन्तन्त्वामनुंमदेम सोम ॥ १४ ॥ सोमों धेनुꣳ सोमो अर्वन्तमाशुꣳ
सोमों वीरङ्कंर्मण्यंन्ददाति ॥ सादन्यँव्विदथ्यंꣳ सभेयंम्पितृश्रवंणँय्यो ददांश
दस्मै ॥ १५ ॥ त्वमिमा ओषंधीस्सोम विश्वास्त्वमपो अंजनयस्त्वङ्गाः ॥ त्वमातं
तन्थोर्वन्तारिंक्षन्त्वञ्ज्योतिंषा वितमों ववर्थ ॥ १६ ॥ देवेनं नोमनंसा देवसोम

रायो भागꣳ संहसावन्नभियुंध्य ॥ मात्वातंनदीशिषे वीर्यंस्योभयेंभ्यःप्रचिकित्सा
गइंष्टौ ॥ १७ ॥ अष्टौ व्यंख्यत्ककुभंः पृथिव्यास्त्री धन्व योजंना सप्त सिन्धूंन् ॥
हिरण्याक्षस्संविता देव आगाद्दधद्रत्नांदाशुषेवार्याँणि॥१८॥हिरंण्यपाणिस्सविता
विचंर्षणिरुभे द्यावांपृथिवी अन्तरींयते ॥ अपामींवाम्बाधंते वेतिसूर्यंमभि
कृष्णेन रजंसा द्यामृंणोति ॥ १९ ॥ हिरंण्यहस्तो असुंरस्सुनीथस्सुंमृळीकस्स्ववां
यात्वर्वाङ् ॥ अपसेधंन्रक्षसों यातुधानानस्थांद्देवः प्रंति दोषङ्गृंणानः ॥२०॥ येते
पन्थांस्सवितःपूर्व्यासोंऽरेणवस्सुकृंता अन्तरिंक्षे ॥ तेभिंर्नोअद्यपथिभिंस्सुगेभीरक्षां
चनो अधिंच ब्रूहि देव ॥ २१ ॥ उभा पिंबतमाश्विनो भानश्शर्मं यच्छतम् ॥ अ
विद्रियाभिंरूतिभिंः ॥ २२ ॥ अप्नंस्वतीमश्विना वाचंमस्मे कृतन्नों दस्रा वृषणा
मनीषाम् ॥ अद्यूत्येऽवंसेनिह्वंये वाँव्वृधे चंनो भवतँव्वाजंसातौ ॥ २३ ॥ द्याभिं

रक्तुभिः परिपातमस्मानरिष्टेभिरश्विना सौभगेभिः ॥ तन्नो मित्रो वरुणो माम
हन्तामदितिस्सिन्धुःपृथिवीउतद्यौः ॥ २४ ॥ आकृष्णेन रजसा वर्तमानो निवेश
यन्नमृतम्मर्त्यञ्च ॥ हिरण्ययेनसविता रथेना देवोयातिभुवनानिपश्यन् ॥२५॥१

आरात्रि पार्थिवꣳ रजः पितुरप्रायिधामभिः ॥ दिवस्सदाꣳसि बृहती विति
ष्ठस आत्वेषँव्वर्तते तमः ॥ १ ॥ उषस्तच्चित्रमाभरास्मभ्यँव्वाजिनीवति ॥ येन
तोकञ्च तनयञ्च धामहे ॥ २ ॥ प्रातर्जितम्भगमुग्रꣳ हुवेम वयम्पुत्रमदितेर्यो
विधर्ता ॥ आध्रश्चिद्यम्मन्यमानस्तुरश्चिद्राजा चिद्यम्भगम्भक्षीत्याह ॥ ३ ॥ पूष
न्तवव्रते वयन्नरिष्येम कदाचन ॥ स्तोतारस्त इहस्मसि ॥ ४ ॥ पथस्पथःपरि
पतिंव्वचस्या कामेन कृतो अभ्यानळर्कम् ॥ सनो रासच्छुरुधश्चन्द्राग्राधियन्धिय
ꣳसीषधाति प्रपूषा ॥ ५ ॥ त्रीणिपदा विचक्रमे विष्णुर्गोपा अदाभ्यः ॥ अतो

धर्माणि धारयन् ॥ ६ ॥ तद्विप्रासो विपन्यवो जागृवाꣳ सस्समिन्धते ॥ विष्णो
र्यत्परमम्पदम् ॥ ७ ॥ घृतवती भुवनानामभिश्रियोर्वी पृथ्वीमधुदुघे सुपेशसा ॥
द्यावापृथिवीवरुणस्य धर्मणा विष्कभिते अजरे भूरिरेतसा ॥ ८ ॥ ये नस्सप
त्नाअपते भवन्त्विन्द्राग्निभ्यामव बाधामहे तान् ॥ वसवो रुद्रा आदित्या उपरि
स्पृशम्मोग्रञ्चेत्तारमधिराजमक्रन् ॥९॥ आनासत्यात्रिभिरेकादशैरिहदेवेभिर्यात
म्मधुपेयमश्विना ॥ प्रायुस्तारिष्टन्नीरपाꣳसि मृक्षतꣳ सेधतन्द्वेषो भवतꣳ सचा
भुवा ॥ १० ॥ एषवस्तोमो मरुत इयङ्गीर्मान्दार्यस्य मान्यस्य कारोः ॥ एषायां
सीष्ट तन्वे वयाँव्विद्यामेषँव्वृजनञ्जीरदानुम् ॥ ११ ॥ सहस्तोमास्सहछन्दसआ
वृतस्सहप्रमा ऋषयस्सप्त दैव्याः॥पूर्वेषाम्पन्थामनुदृश्य धीरा अन्वालेभिरे रथ्यो
नरश्मीन् ॥ १२ ॥ आयुष्यँव्वर्चस्यꣳ रायस्पोषमौद्भिदम् ॥ इदꣳ हिरण्यँव्वर्चस्व

जैत्राया विंशतादुमाम् ॥ १३ ॥ न तद्रक्षाꣳसि न पिशाचास्तरन्ति देवानामोजः प्रथमजꣳ
ह्येतत् ॥ यो बिभर्ति दाक्षायणꣳ हिरण्यꣳ स देवेषु कृणुते दीर्घमायुस्स मनु
ष्येषु कृणुते दीर्घमायुः ॥ १४ ॥ यदाबध्नन्दाक्षायणा हिरण्यꣳ शतानीकाय सुम
नस्यमानाः ॥ तन्म आबध्नामि शतशारदायायुष्माञ्जरदष्टिर्यथासम् ॥ १५ ॥ उत
नोऽहिर्बुध्न्यः शृणोत्वज एकपात्पृथिवी समुद्रः ॥ विश्वे देवा ऋतावृधो हुवानास्तु
ता मन्त्राः कविशस्ता अवन्तु ॥ १६ ॥ इमा गिर आदित्येभ्यो घृतस्नूस्सनाद्राज
भ्यो जुह्वा जुहोमि ॥ शृणोतु मित्रो अर्यमा भगो नस्तुविजातो वरुणो दक्षो अꣳ
शः ॥ १७ ॥ सप्त ऋषयः प्रतिहिताश्शरीरे सप्त रक्षन्ति सदमप्रमादम् ॥ सप्ता
पस्स्वपतो लोकमीयुस्तत्र जागृतो अस्वप्नजौ सत्रसदौ च देवौ ॥ १८ ॥ उत्तिष्ठ
ब्रह्मणस्पते देवयन्तस्त्वेमहे ॥ उप प्रयन्तु मरुतस्सुदानव इन्द्र प्राशूर्भवा सचा ॥ १९ ॥

प्र नूनम्ब्रह्मणस्पतिर्मन्त्रं वदत्युक्थ्यम् ॥ यस्मिन्निन्द्रो वरुणो मित्रो अर्यमा देवा
ओकाꣳसि चक्रिरे ॥ २० ॥ ब्रह्मणस्पते त्वमस्य यन्ता सूक्तस्य बोधि तनयञ्च
जिन्व ॥ विश्वन्तद्भद्रं यदवन्ति देवा बृहद्वदेम विदथे सुवीराः ॥ य इमा विश्वा वि
श्वकर्मा यो नः पिता ऽन्नपते ऽन्नस्य नो देहि ॥ २१ ॥ २ हरिः ॐ

यज्जाग्रतः पञ्चविंशतिः ॥ २५ ॥ आरात्येकविंशतिः ॥ २१ ॥ द्वयोरनुवाकयोः
षट्चत्वारिंशत् ॥ ४६ ॥ प्राणाय वाजस्य होता यज्जाग्रतश्च षट्चत्वारिंशत् ॥ इति शु
क्लयजुर्वेदकाण्वसꣳहितापाठे त्रयस्त्रिंशतिमोऽध्यायः ॥ हरिः ॐ ॥

हरिः ॐ ॥ देव सवितः प्रसुव यज्ञम्प्रसुव यज्ञपतिम्भगाय ॥ दिव्यो गन्ध
र्वः केतपूः केतन्नः पुनातु वाचस्पतिर्वाचन्नस्स्वदतु ॥ १ ॥ तत्सवितुर्वरेण्यम्भ
र्गो देवस्य धीमहि ॥ धियो यो नः प्रचोदयात् ॥ २ ॥ विश्वानि देव सवि

तर्दुरितानिपरा सुव ॥ यद्भद्रन्तन्न आसुव ॥ ३ ॥ विभक्तारꣳ हवामहे वसोश्चि
त्रस्य राधसः ॥ सवितारन्नृचक्षसम् ॥ ४ ॥ ब्रह्मणे ब्राह्मणङ्क्षत्राय राजन्यम्मरु
द्भ्यो वैश्यन्तपसेशूद्रन्तमसे तस्करन्नारकाय वीरहणम् ॥ पाप्मने क्लीबमाक्रया
या अयोगूङ्कामाय पुꣳश्चल्लूमतिक्रुष्टाय मागधम् ॥ ५ ॥ नृत्ताय सूतङ्गीताय शै
लूषन्धर्माय सभाचरन्नरिष्ठायै भीमलम् ॥ नर्माय रेभꣳ हसाय कारिमानन्दाय
स्त्रीषखम्प्रमदे कुमारी पुत्रम्मेधायै रथकारन्धैर्याय तक्षाणम् ॥ ६ ॥ तपसे कौ
लालम्मायायै कर्मारꣳ रूपाय मणिकारꣳ शुभे वपꣳ शरव्यायाइषुकारꣳ हेत्यै
धनुष्कारम् ॥ कर्मणेज्याकारन्दिष्टाय रज्जुसर्जम्मृत्यवे मृगयुमन्तकाय श्वनिन
म् ॥ ७ ॥ नदीभ्यः पौञ्जिष्टमृक्षीकाभ्यो नैषादम्पुरुषव्याघ्रायदुर्मदङ्गन्धर्वाप्सरो
भ्यो व्रात्यम् ॥ प्रयुग्भ्य उन्मत्तꣳ सर्पदेवजनेभ्योऽप्रतिपदमयेभ्यः कितवमीर्यता

याअकितवम्पिशाचेभ्यो बिदलकारीय्यातुधानेभ्यःकण्टकीकारीम् ॥ ८ ॥ १

सन्धये जारङ्गेहायोपपतिमार्त्यै परिवित्तन्निर्ऋत्यै परिविविदानमराध्याएदिधि
षुः पतिन्निष्कृत्यै पेशस्कारीꣳ सञ्ज्ञानाय स्मरकारीम् ॥ प्रकामोद्यायोपसदꣳव
र्णायानुरुधम्बलायो पदाम्॥१॥उत्सादेभ्यःकुब्जम्प्रमुदे वामनन्द्वाभ्यस्स्रामꣳ स्व
प्नायान्धमधर्माय बधिरम्पवित्रायाभिषजम् ॥ प्रज्ञानाय नक्षत्रदर्शमाशिक्षायै प्र
श्निनमुपशिक्षाया अभिप्रश्निनम्मर्यादायै प्रश्नविवाकम् ॥२॥ अर्मेभ्यो हस्तिपञ्जवा
याश्वपम्पुष्ट्यै गोपालँव्वीर्यायाविपालन्तेजसेऽजपालमिरायै कीनाशम् ॥ कीला
लाय सुराकारम्भद्राय गृहपꣳ श्रेयसे वित्तधमाध्यक्षायानुक्षत्तारम् ॥३॥ भायैदा
र्वाहारम्प्रभायाअग्न्येधम्ब्रध्नस्यविष्टपायाभिषेक्तारँव्वर्षिष्ठायनाकाय परिवेष्टारम् ॥
देवलोकाय पेशितारम्मनुष्यलोकाय प्रकरितारꣳ सर्वेभ्यो लोकेभ्य उपसेक्तार

मर्व ऋत्यै वधायोपमन्थितारम्मेधाय वासः पल्पूलीम्प्रकामाय रजयित्रीम् ॥४॥
ऋतये स्तेनहृदयँव्वैरहत्याय पिशुनँव्विविक्त्यै क्षत्तारमौपद्रष्ट्र्यायानुक्षत्तारम्ब
लायानु चरम्भूम्ने परिष्कन्दम् ॥ प्रियाय प्रियवादिनमरिष्ट्या अश्वसादꣳ स्व
र्गाय लोकाय भागदुघँव्वर्षिष्ठाय नाकाय परिवेष्टारम् ॥ ५ ॥ २

मन्यवेऽ यस्तापङ्क्रोधाय निसरँय्योगाय योक्तारꣳ शोकायाभिसर्तारङ्क्षेमा
य विमोक्तारमुत्कूलनिकूलेभ्यस्त्रिष्ठिनम् ॥ वपुषे मानस्कृतꣳ शीलायाञ्जनीकारी
न्निर्ऋत्यैकोशकारींय्यमायासूम् ॥ १ ॥ यमाय यमसूमथर्वभ्योऽवतोकाꣳ सँव्व
त्सराय पर्यायिणीम्परिवत्सरायाविजातामिदावत्सरायातीत्वरीमिद्वत्सरायातिष्क
द्वरीम् ॥ वत्सराय विजर्जराꣳ सँव्वत्सराय पलिक्नीमृभुभ्योऽजिनसन्धꣳसाध्येभ्य
श्चर्मम्नम् ॥ २ ॥ सरोभ्यो धैवरमुपस्थावराभ्यो दाशँव्वैशन्ताभ्यो बैन्दन्नड्वला

भ्यः शौष्कलम् ॥ पाराय मार्गारमवाराय केवर्तन्तीर्थेभ्य आन्दँव्विषमेभ्योमैनालम् ॥
स्वनेभ्यः पर्णकङ्गुहाभ्यः किरातꣳ सानुभ्यो जम्भकम्पर्वतेभ्यः किम्पूरुषम् ॥३॥
बीभत्सायै पौल्कसँव्वर्णाय हिरण्यकारन्तुलायै वाणिजम्पश्चादोषाय ग्लाविनँ
व्विश्वेभ्यो भूतेभ्यस्सिधमलम् ॥ भूत्यै जागरणमभूत्यै स्वपनमार्त्यै जनवादिनँ
व्व्यृध्या अपगल्भꣳ सꣳ शराय प्रच्छिदम् ॥ ४ ॥ अक्षराजाय कितवङ्कृतायादि
नवदर्शन्त्रेतायै कल्पिनन्द्वापरायाधिकल्पिनमास्कन्दाय सभास्थाणुम्मृत्यवेगोव्य
च्छमन्तकाय गोघातम् ॥ क्षुधे योगाँव्विकृन्तन्तम्भिक्षमाण उपतिष्ठति दुष्कृता
यचरकाचार्यम्पाप्मने सैलगम् ॥ ५ ॥ ३

प्रतिश्रुत्काया अर्तनङ्घोषाय भषमन्ताय बहुवादिनमनन्ताय मूकꣳ शब्दा
याळम्बराघातम् ॥ महसे वीणावादङ्क्रोशाय तूणवध्मम्वरस्पराय शङ्खध्मँव्व

नाय वनपमन्यतोऽरण्यायदावपम् ॥ १ ॥ नर्मायं पुंश्चलूँ हसायकारिंयादसे
शाबल्याङ्ग्रामण्यङ्गणकमभि क्रोशकन्तान्महसे ॥ वीणावादम्पाणिघ्नन्तूणवध्म
न्तान्नृत्तायानन्दाय तलवम् ॥ २ ॥ अग्नयेऽपीवानम्पृथिव्यै पीठसर्पिणँव्वायवे
चाण्डालमन्तरिक्षायवँशनर्तिनन्दिवेखलतिँ सूर्याय हर्यक्षम् ॥ नक्षत्रेभ्यः कि
र्मिरञ्चन्द्रमसे किलासमह्ने शुक्लम्पिङ्गाक्षँ रात्र्यै कृष्णम्पिङ्गाक्षम् ॥ ३ ॥ अथै
तानष्टौ विरूपानालभतेति शुक्लञ्चाति कृष्णञ्चाति दीर्घञ्चाति ह्रस्वञ्च॥ अति
स्थूलञ्चाति कृशञ्चाति कूल्वञ्चाति लोमशञ्चाशूद्रा अब्राह्मणास्ते प्राजापत्याः॥
मागधःपुंश्चलीक्लीबःकितवोऽशूद्राअब्राह्मणास्ते प्राजापत्याः ॥४॥ ४ ॥ हरिःॐ
देवसवितरष्ट ॥ ८ ॥ सन्धयेजारम्पञ्च ॥५॥ मन्यवेच ॥ ५ ॥ प्रतिश्रुत्का
यै चतस्रः ॥ ४ ॥ चतुरनुवाकेषु द्वाविंशतिः ॥ २२ ॥ इति शुक्लयजुर्वेदकाण्व

संहितापाठे चतुस्त्रिंशतिमोऽध्यायः ॥ हरिःॐ ॥

हरिःॐ ॥ सहस्रशीर्षा पुरुषस्सहस्राक्षस्सहस्रपात् ॥ सभूमिँ सर्वतस्पृत्वा
त्यतिष्ठद्दशाङ्गुलम् ॥ १ ॥ पुरुष एवेदँ सर्वय्यद्भूतय्यच्च भाव्यम् ॥ उतामृत
त्वस्येशानो यदन्नेनातिरोहति ॥ २ ॥ एतावानस्य महिमातो ज्यायाँश्चपूरुषः॥
पादोऽस्य विश्वा भूतानि त्रिपादस्यामृतन्दिवि ॥ ३ ॥ त्रिपादूर्ध्व उदैत्पुरुषः पा
दोऽस्येहाभवत्पुनः ॥ ततो विष्वङ्व्यक्रामत्साशनानशने अभि ॥ ४ ॥ ततो वि
राळजायत विराजो अधि पूरुषः॥ सजातो अत्यरिच्यत पश्चाद्भूमिमथो पुरः॥५॥
तस्माद्यज्ञात्सर्वहुतस्सम्भृतम्पृषदाज्यम् ॥ पशूँस्ताँश्चक्रे वायव्यानारण्या ग्रा
म्याश्चये ॥ ६ ॥ तस्माद्यज्ञात्सर्वहुतऋचस्सामानि जज्ञिरे ॥ छन्दाँसि जज्ञिरे
तस्माद्यजुस्तस्मादजायत ॥ ७ ॥ तस्मादश्वा अजायन्त येके चोभयादतः ॥

गावोह जज्ञिरे तस्मात्तस्माज्जाता अजावयः ॥ ८ ॥ तँय्यज्ञम्बर्हिषि प्रौक्षन्पुरुष
आतमग्रतः॥ तेन देवा अयजन्त साध्या ऋषयश्चये ॥ ९ ॥ यत्पुरुषँव्व्यदधुःक
तिधा व्यकल्पयन् ॥ मुखङ्किमस्यासीत्किम्बाहूकिमूरू पाद उच्येते ॥ १० ॥ ब्रा
ह्मणोऽस्य मुखमासीद्बाहूराजन्यःकृतः ॥ ऊरू तदस्य यद्वैश्यः पद्भ्याँ शूद्रोअ
जायत ॥ ११ ॥ चन्द्रमामनसो जातश्चक्षोस्सूर्यो अजायत ॥ श्रोत्राद्वायुश्च प्राण
श्चमुखादग्निरजायत ॥ १२ ॥ नाभ्या आसीदन्तरिक्षँ शीर्ष्णो द्यौस्समवर्तत ॥
पद्भ्याम्भूमिर्दिशःश्रोत्रात्तथा लोकाँ२अकल्पयन् ॥ १३ ॥ यत्पुरुषेण हविषादेवा
यज्ञमतन्वत॥ वसन्तोऽस्यासीदाज्यङ्ग्रीष्म इध्मश्शरद्धविः ॥ १४ ॥ सप्तास्यास
न्परिधयस्त्रिस्सप्त समिधः कृताः॥ देवा यद्यज्ञन्तन्वाना अबध्नन्पुरुषम्पशुम्॥१५॥
यज्ञेन यज्ञमयजन्त देवास्तानि धर्माणि प्रथमान्यासन् ॥ तेह नाकम्महिमान

स्सचन्त यत्र पूर्वे साध्यास्सन्ति देवाः ॥ १६ ॥ १

अद्भ्यस्सम्भृतः पृथिव्यै रसाच्च विश्वकर्मणस्समवर्तताग्रे ॥ तस्य त्वष्टा
विदधद्रूपमेति तन्मर्त्यस्य देवत्वमा जानमग्रे ॥ १ ॥ वेदाहमेतम्पुरुषम्महान्त
मादित्यवर्णन्तमसःपरस्तात् ॥ तमेवविदित्वाति मृत्युमेति नान्यःपन्था विद्य
तेऽयनाय ॥ २ ॥ प्रजापतिश्चरति गर्भे अन्तरजायमानो बहुधा विजायते ॥
तस्य योनिम्परिपश्यन्ति धीरास्तस्मिन्हतस्थुर्भुवनानि विश्वा ॥ ३ ॥ यो देवे
भ्य आतपति यो देवानाम्पुरोहितः ॥ पूर्वो यो देवेभ्यो जातो नमो रुचाय
ब्राह्मये ॥ ४ ॥ रुचम्ब्राह्मञ्जनयन्तो देवा अग्रे तदब्रुवन् ॥ यस्त्वैवम्ब्राह्मणो
विद्यात्तस्य देवा असन्वशे ॥ ५ ॥ श्रीश्चते लक्ष्मीश्च पत्न्या अहोरात्रे पार्श्वे
नक्षत्राणि रूपमश्विनौ व्यात्तम् ॥ इष्णन्निषाणामुम्म इषाण सर्वलोकम्म

इषाण ॥ ६ ॥ २ ॥

तदेवाग्निस्तदादित्यस्तद्वायुस्तदु चन्द्रमाः ॥ तदेव शुक्रन्तद्ब्रह्म तदापस्त
त्प्रजापतिः ॥ १ ॥ सर्वेनिमेषा जज्ञिरे विद्युतः पुरुषादधि ॥ नैनमूर्ध्वन्नतिर्यञ्चन्न
मध्ये परिजग्रभत् ॥ २ ॥ नतस्य प्रतिमा अस्ति यस्यनाम महद्यशः ॥ हिरण्य
गर्भ इत्येषः॥३॥एषोहदेवः प्रदिशोऽनु सर्वाः पूर्वोह जातस्सउगर्भे अन्तः ॥ स
एव जातस्सजनिष्यमाणः प्रत्यङ्जनास्तिष्ठति सर्वतो मुखः ॥ यस्मान्नजा
तइत्येषः॥४॥वेनस्तत्पश्यन्निहितं तद्गुहा सद्यत्र विश्वम्भवत्येकनीळम् ॥ तस्मिन्नि
दꣳ सञ्चविचैति सर्वꣳ सओतःप्रोतश्च विभूःप्रजासु ॥ ५ ॥ प्रतद्वोचेदमृतन्नु
विद्वान्गन्धर्वो धाम विभृतङ्गुहा सत् ॥ त्रीणि पदानि निहितागुहास्ययस्तानि
वेद सपितुः पितासत् ॥ ६ ॥ सनो बन्धुर्जनिता सविधाता धामानि वेद भुव

नानि विश्वा ॥ यत्रदेवा अमृतमानशानास्तृतीये धामन्नध्यैरयन्त ॥ ७ ॥ परी
त्यभूतानि परीत्य लोकान्परीत्यसर्वाःप्रदिशोदिशश्च ॥ उपस्थाय प्रथमजा मृत
स्यात्मनात्मानमभिसँविवेश ॥ ८ ॥ परिद्यावापृथिवी सद्यइत्वा परिलोकान्परि
दिशःपरिस्वः ॥ ऋतस्य तन्तुँविततँविचृत्य तदपश्यत्तदभवत्तदासीत् ॥ ९ ॥
सदसस्पति मद्भुतम्प्रियमिन्द्रस्य काम्यम् ॥ सनिम्मेधामयासिषꣳ स्वाहा ॥१०॥
याम्मेधान्देवगणाः पितरश्चोपासते ॥ तयामामद्य मेधयाग्ने मेधाविनङ्कुरु स्वा
हा ॥ ११ ॥ इदम्मे ब्रह्मच क्षत्रञ्चोभे श्रियमश्नुताम् ॥ मयि देवा दधतुश्रिय
मुत्तमान्तस्यैते स्वाहा ॥ १२ ॥ ३

अपेतो यन्तु पणयोऽसुम्ना देवपीयवः ॥ अस्य लोकस्सुतावतः ॥ १ ॥ द्युभि
रहोभिरक्तुभिर्व्यक्तँय्यमो ददात्ववसानमस्मै ॥ सविता ते शरीरेभ्यः पृथिव्याँ

ल्लोकमिच्छतु ॥ तस्मै युज्यन्तामुस्त्रियाः ॥ २ ॥ वायुःपुनातु सविता पुना
त्वग्नेर्भ्राजसा सूर्यस्य वर्चसा ॥ विमुच्यन्तामुस्त्रियाः ॥ ३ ॥ अश्वत्थेवो नि
षद्नम्पर्णेवो वसतिष्कृता ॥ गोभाज इत्किलासथ यत्सनवथ पूरुषम् ॥ ४ ॥
सविता ते शरीराणि मातुरुपस्थ आवपतु ॥ तस्मै पृथिवि शम्भव ॥ प्रजा
पतौ त्वा देवतायामुपोदके लोके निदधाम्यसौ ॥ ५ ॥ परम्मृत्यो अनुपरे
हि पन्थाँय्यस्तेअन्य इतरो देवयानात् ॥ चक्षुष्मते शृण्वते ते ब्रवीमि मानः
प्रजाꣳ रीरिषो मोत वीरान् ॥ ६ ॥ शँव्वातश्शꣳ हिते घृणिश्शन्ते भवन्त्विष्ट
काः ॥ शन्ते भवन्त्वग्नयः पार्थिवासो मात्वाभि शूशुचन् ॥ ७ ॥ कल्पन्ता
न्ते दिशस्तुभ्यमापःशिवतमास्तुभ्यम्भवतु सिन्धवः ॥ अन्तरिक्षꣳ शिवन्तुभ्य
ङ्कल्पन्तान्ते दिशस्सर्वाः ॥ ८ ॥ अश्मन्वती रीयते सꣳरभध्वमुत्तिष्ठत प्रतर

तासखायः ॥ अत्रा जहीमोऽशिवाये असञ्छिवान्वयमुत्तरेमाभिवाजान् ॥९॥अपा
घमप किल्बिषमपकृत्यामपो रपः॥ अपा मार्ग त्वमस्मदप दुःष्वप्न्यꣳ सुव॥१०॥
सुमित्रियान आप ओषधयस्सन्तु दुर्मित्रियास्तस्मै सन्तु ॥ योऽस्मान्द्वेष्टि यञ्च
वयन्द्विष्मः ॥ ११ ॥ अनड्वाहमन्वारभामहे स्वस्तये ॥ सन इन्द्रइव देवेभ्यो
वह्निस्सन्तारणो भव ॥ १२ ॥ उद्वयन्तमसस्परिस्वःपश्यन्तउत्तरम् ॥ देवन्देवत्रा
सूर्यमगन्म ज्योतिरुत्तमम् ॥ १३ ॥ अग्नआयूꣳषि पवस आसुवोर्जमिषञ्चनः ॥
आरे बाधस्वदुच्छुनाम् ॥ १४ ॥ आयुष्मानग्ने हविषा वृधानो घृतप्रतीको घृतयो
निरेधि ॥ घृतम्पीत्वा मधुचारु गव्यम्पितेव पुत्रमभिरक्षतादिमान्त्स्वाहा ॥१५॥
इमञ्जीवेभ्यः परिधिन्दधामि मैषान्नु गादपरो अर्थमेतम् ॥ शतञ्जीवन्तुशरदः
पुरूचीरन्तर्मृत्युन्दधताम्पर्वतेन ॥ १६ ॥ परीमे गामनेषत पर्यग्निमहृषत ॥ देवे

ष्वंक्रत श्रवःकइमाँ२आदधर्षति ॥ १७ ॥ क्रव्यादमग्निम्प्रहिणोमिदूरँय्यमराज्यं
ङ्गच्छतु रिप्रवाहः॥इहैवायमितरो जातवेदा देवेभ्यो हव्यँव्वहतु प्रजानन् ॥१८॥
वहवपाञ्जातवेदः पितृभ्यो यत्रैं नान्वेत्थ निहितान्पराके ॥ मेदसःकुल्या उपता
न्त्स्रवन्तु सत्या एषामाशिषस्सन्तु कामास्स्वाहा ॥ १९॥ स्योनापृथिविनो भवा
नृक्षरा निवेशनी ॥ यच्छा नश्शर्म सप्रथाः ॥ अपनश्शोशुचदघम् ॥२०॥ अस्मा
त्त्वमधि जातोऽसि त्वदयञ्जायताम्पुनः ॥ असौ स्वर्गाय लोकाय स्वाहा ॥ अप
नश्शोशुचदघम् ॥ २१ ॥ ४ ॥ हरिःॐ

सहस्रशीर्षाषोडश ॥ १६ ॥ अद्भ्यस्सम्भृतःषट् ॥ ६॥ तदेवाग्निर्द्वादश ॥१२॥
अपेतोयन्त्वेकविंशतिः ॥२१॥ चतुरनुवाकेषुपञ्चपञ्चाशत् ॥५५॥ अग्नेस्तनूरसि
सहस्रशीर्षाचपञ्चपञ्चाशत् ॥ इति शुक्लयजुर्वेद काण्वसँहितापाठेपञ्चविंशति

तमोऽध्यायः ॥ हरिःॐ

हरिःॐ ॥ ऋचँव्वाचम्प्रपद्ये मनो यजुः प्रपद्ये साम प्राणम्प्रपद्ये चक्षुःश्रोत्र
म्प्रपद्ये ॥ वागोजस्सहोजो मयि प्राणापानौ ॥ १ ॥ यन्मे छिद्रञ्चक्षुषो हृदय
स्यमनसो वातितृण्णम्बृहस्पतिर्मे तद्दधातु ॥ शन्नोभवतु भुवनस्य यस्पतिः ॥२॥
भूर्भुवस्स्वः ॥ तत्सवितुर्वरेण्यम्भर्गोदेवस्य धीमहि ॥ धियोयोनः प्रचोदयात् ॥३॥
कयानश्चित्र आभुवदूती सदावृधस्सखा ॥ कया शचिष्ठया वृता॥४॥कस्त्वासत्यो
मदानाम्मँहिष्ठो मत्सदन्धसः ॥ दृह्ळाचिं दारुजेवसु ॥ ५ ॥ अभीषुणस्सखीं
नामविता जरितृणाम् ॥ शतम्भवास्यूतिभिः ॥ ६ ॥ कया त्वन्न ऊत्याभि प्रम
न्दसे वृषन् ॥ कया स्तोतृभ्य आभर ॥ ७ ॥ इन्द्रो विश्वस्य राजति ॥ शन्नो
अस्तु द्विपदे शञ्चतुष्पदे ॥ ८ ॥ शन्नो मित्रश्शँव्वरुणश्शन्नो भवत्वर्यमा ॥ श

न्नइन्द्रो बृहस्पतिश्शन्नो विष्णुरुरुक्रमः ॥ ९ ॥ शन्नो वातः पवताꣳशन्नस्तपतु
सूर्यः ॥ शन्नःकनिक्रदद्देवः पर्जन्यो अभि वर्षतु ॥ १० ॥ अहानि शम्भवन्तु न
श्शꣳरात्रिःप्रतिधीयताम् ॥ शन्न इन्द्राग्नी भवतामवोभिश्शन्न इन्द्रावरुणा रात
हव्या ॥ शन्न इन्द्रापूषणा वाजसातौ शमिन्द्रासोमा सुविताय शँय्योः ॥ ११ ॥
शन्नो देवीरभिष्टय आपो भवन्तु पीतये ॥ शँय्योरभिस्रवन्तुनः ॥ १२ ॥ स्योना
पृथिविनो भवानृक्षरा निवेशनी ॥ यच्छानश्शर्म सप्रथाः ॥ १३ ॥ आपोहिष्ठा म
योभुवस्तान ऊर्जे दधातन ॥ महे रणाय चक्षसे ॥ १४ ॥ योवश्शिवतमोरसस्त
स्य भाजयतेहनः ॥ उशतीरिव मातरः ॥ १५ ॥ तस्मा अरङ्गमामवो यस्यक्ष
याय जिन्वथ ॥ आपोजनयथाचनः ॥१६॥ द्यौश्शान्तिरन्तरिक्षꣳ शान्तिःपृथिवी
शान्तिरापश्शान्तिरोषधयश्शान्तिः ॥ वनस्पतयश्शान्तिश्शान्तिरेवशान्तिः ॥१७॥

दृतेदृꣳहमामित्रस्य माचक्षुषा सर्वाणि भूतानि समीक्षन्ताम् ॥ मित्रस्याहञ्चक्षु
षासर्वाणि भूतानि समीक्षे ॥ मित्रस्य चक्षुषा समीक्षामहे ॥१८॥ दृतेदृꣳहमा ॥
ज्योक्ते सन्दृशि जीव्यासञ्ज्योक्ते सन्दृशिजीव्यासम् ॥ १९ ॥ नमस्ते हरसे शो
चिषेनमस्ते अस्त्वर्चिषे ॥ अन्याꣳस्ते अस्मत्तपन्तु हेतयःपावको अस्मभ्यꣳ शि
वोभव ॥ २० ॥ नमस्ते अस्तु विद्युते नमस्तेस्तनयित्नवे ॥ नमस्ते भगवन्नस्तु
यतस्स्वस्समीहसे ॥ २१ ॥ यतो यतस्समीहसे ततोनो अभयङ्कुरु ॥ शन्नःकुरु
प्रजाभ्योऽभयन्नः पशुभ्यः ॥ २२ ॥ सुमित्रियान आप ओषधयस्सन्तुदुर्मित्रिया
स्तस्मै सन्तु ॥ योऽस्मान्द्वेष्टियञ्च वयन्द्विष्मः ॥२३॥ तच्चक्षुर्देवहितम्पुरस्ताच्छु
क्रमुच्चरत् ॥ पश्येम शरदश्शतञ्जीवेम शरदश्शतꣳ शृणुयामशरदश्शतम् ॥२४॥
॥१॥ हरिःॐ ॥

ऋचँव्वाचमित्येकानुवाकेचतुर्विंशतिः ॥ २४ ॥ इतिशुक्लयजुर्वेदकाण्वसँहिता
पाठे षट्त्रिंशतितमोऽध्यायः ॥ हरिःॐ॥

हरिःॐ ॥ देवस्य त्वा सवितुः प्रसवेऽश्विनो र्बाहुभ्याम्पूष्णो हस्ताभ्याम् ॥
आददे नारिरसि ॥ १ ॥ युञ्जते मन उत युञ्जते धियो विप्रा विप्रस्य बृह
तो विपश्चितः ॥ विहोत्रा दधे वयुनाविदेक इन्मही देवस्य सवितुःपरि
ष्टुतिः ॥ २ ॥ देवी द्यावा पृथिवी मखस्य वामद्यशिरो राध्यासन्देवयजने पृ
थिव्याः ॥ मखायत्वा मखस्य त्वा शीर्ष्णे ॥ ३ ॥ देव्यो वम्रियो भूतस्य प्र
थमजा मखस्य वोऽद्य शिरो राध्यासन्देव यजने पृथिव्याः ॥ मखाय त्वा म
खस्य त्वा शीर्ष्णे ॥ ४ ॥ इयत्यग्र आसीर्मखस्य तेऽद्यशिरो राध्यासन्देवयज
ने पृथिव्याः ॥ मखाय त्वा मखस्य त्वा शीर्ष्णे ॥ ५ ॥ इन्द्रस्यौजस्थ म

खस्य वोऽद्यशिरो राध्यासन्देवयजने पृथिव्याः ॥ मखाय त्वा मखस्य त्वा शी
र्ष्णे ॥ मखाय त्वा मखस्य त्वा शीर्ष्णे ॥ मखाय त्वा मखस्य त्वा शीर्ष्णे ॥ ६ ॥
प्रैतु ब्रह्मणस्पतिः प्रदेव्येतु सूनृता ॥ अच्छावीरन्नर्यम्पङ्क्तिराधसन्देवा यज्ञ
न्नयन्तुनः ॥ मखाय त्वा मखस्य त्वा शीर्ष्णे ॥ मखाय त्वा मखस्य त्वा
शीर्ष्णे ॥ मखाय त्वा मखस्य त्वा शीर्ष्णे ॥ ७ ॥ मखस्य शिरोऽसि ॥ म
खाय त्वा मखस्य त्वा शीर्ष्णे ॥ मखस्य शिरोऽसि ॥ मखाय त्वा मखस्य
त्वा शीर्ष्णे ॥ मखस्य शिरोऽसि ॥ मखाय त्वा मखस्य त्वा शीर्ष्णे ॥ मखा
य त्वा मखस्य त्वा शीर्ष्णे मखाय त्वा मखस्य त्वा शीर्ष्णे मखाय त्वा मखस्य
त्वा शीर्ष्णे ॥ ८ ॥ अश्वस्य त्वा वृष्णश्शक्ना धूपयामि देवयजने पृथिव्याः ॥
मखाय त्वा मखस्य त्वा शीर्ष्णे ॥ अश्वस्य त्वा वृष्णश्शक्ना धूपयामि देवय

जने पृथिव्याः ॥ मखाय त्वा मखस्य त्वा शीर्ष्णे ॥ अश्वस्य त्वा वृष्णश्श
क्ना धूपयामि देवयजने पृथिव्याः ॥ मखाय त्वा मखस्य त्वा शीर्ष्णे ॥ मखा
य त्वा मखस्य त्वा शीर्ष्णे मखाय त्वा मखस्य त्वा शीर्ष्णे मखाय त्वा मखस्य
त्वाशीर्ष्णे ॥ ९ ॥ ऋजवेत्वा साधवेत्वा सुक्षित्यैत्वा ॥ मखायत्वा मखस्यत्वा शी
र्ष्णे ॥ मखायत्वा मखस्यत्वा शीर्ष्णे॥मखायत्वा मखस्यत्वा शीर्ष्णे ॥ १० ॥ १

यमाय त्वा मखाय त्वा सूर्यस्य त्वा तपसे ॥ देवस्त्वा सविता मध्वानक्तु
पृथिव्यास्सꣳ स्पृशस्पाहि ॥ अर्चिरसि शोचिरसि तपोऽसि ॥ १ ॥ अनाधृ
ष्टा पुरस्तादग्नेराधिपत्य आयुर्मेदाः पुत्रवती दक्षिणत इन्द्रस्याधिपत्ये प्रजाम्मे
दाः ॥ सुषदापश्चाद्देवस्य सवितुराधिपत्ये चक्षुर्मेदा आश्रुतिरुत्तरतो धातुराधि
पत्ये रायस्पोषम्मेदाः ॥ विधृतिरुपरिष्टाद्बृहस्पते राधिपत्य ओजोमेदा विश्वा

भ्यो मानाष्ट्राभ्य स्पाहिमनो रश्वासि ॥ २ ॥ स्वाहा मरुद्भिः परिश्रीयस्व दि
वस्सꣳ स्पृशस्पाहि॥मधु मधु मधु ॥ ३ ॥ २

गर्भो देवानाम्पिता मतीनाम्पतिःप्रजानाम् ॥ सन्देवो देवेन सवित्रागतसꣳ
सूर्येण रोचते ॥ १ ॥ समग्निरग्निनागत सन्दैवेन सवित्रासꣳ सूर्येणारोचिष्ट ॥
स्वाहा समग्निस्तपसागत सन्दैव्येन सवित्रासꣳ सूर्येणारूरुचत ॥ २ ॥ धर्ता
दिवो विभाति तपसस्पृथिव्यान्धर्ता देवो देवानाममर्त्यस्तपोजाः ॥ वाचमस्मे
नियच्छ देवायुवम् ॥३॥ अपश्यङ्गोपामनिपद्यमानमाचपराच पथिभिश्चरन्तम् ॥
ससध्रीचीस्सविषूचीर्वसान आवरीवर्ति भुवनेष्वन्तः ॥ ४ ॥ विश्वासाम्भुवाम्पते
विश्वस्य मनसस्पते विश्वस्य वचसस्पते सर्वस्य वचसस्पते ॥ देवश्रुत्त्वन्देवघर्म
देवो देवान्पाह्यत्रप्रावीरनु वान्देव वीतये ॥ मधु माध्वीभ्याम्मधुमाधूचीभ्याम् ॥

हृदे त्वा मनसे त्वा दिवे त्वा सूर्याय त्वा ॥ ऊर्ध्वो अध्वरन्दिवि देवेषु
धेहि ॥ ५ ॥ पिता नोऽसि पिता नो बोधि नमस्ते अस्तु मामा हिꣳसीः ॥
त्वष्टृमन्तस्त्वा सपेम पुत्रान्पशून्मयि धेह्यरिष्टाहꣳ सहपत्या भूयासम् ॥ ६ ॥
अहः केतुना जुषताꣳ सुज्योतिर्ज्योतिषा स्वाहा ॥ रात्रिः केतुना जुषताꣳ सु
ज्योतिर्ज्योतिषा स्वाहा ॥ ७ ॥ ३ ॥ हरिःॐ ॥

देवस्य त्वा दश ॥१०॥ यमाय तिस्रः ॥ ३ ॥ गर्भोदेवानां सप्त ॥ ७ ॥
ऽयनुवाकेषु विंशतिः ॥ २० ॥ इति शुक्लयजुर्वेद काण्व संहितापाठे सप्तत्रिंश
तितमोऽध्यायः ॥ हरिःॐ ॥

हरिःॐ॥ देवस्य त्वा सवितुः प्रसवेऽश्विनोर्बाहुभ्याम्पूष्णो हस्ताभ्याम् ॥
आददेऽदित्यै रास्नासि ॥ १ ॥ इळ एह्यदित एहि सरस्वत्येहि ॥ असावेह्य
सावेह्यसावेहि ॥ २ ॥ अदित्यै रास्नासीन्द्राण्या उष्णीषः ॥ पूषासि घर्माय
दीष्व ॥ ३ ॥ अश्विभ्याम्पिन्वस्व सरस्वत्यै पिन्वस्वेन्द्राय पिन्वस्व ॥ स्वाहे
न्द्रवत्स्वाहेन्द्रवत्स्वाहेन्द्रवत् ॥ ४ ॥ यस्ते स्तनश्शशयो योमयोभूर्यो रत्नधा वसु
विद्यस्सुदत्रः ॥ येन विश्वा पुष्यसि वार्याणि सरस्वतितमिह धातवेऽकः ॥ उर्व
न्तरिक्षमन्वेमि ॥ ५ ॥ गायत्रञ्छन्दोऽसि त्रैष्टुभञ्छन्दोऽसि द्यावापृथिवीभ्यान्त्वा
परिगृह्णाम्यन्तरिक्षेणोपयच्छामि ॥ इन्द्राश्विना मधुनस्सारघस्य घर्मम्पात वसं
वोयजतवाट् ॥ स्वाहा सूर्यस्य रश्मये वृष्टिवनये ॥ ६ ॥ १

समुद्रायत्वा वाताय स्वाहा सरिरायत्वा वाताय स्वाहा ॥ अनाधृष्यायत्वा
वाताय स्वाहा प्रतिधृष्यायत्वा वाताय स्वाहा ॥ अवस्यवेत्वा वाताय स्वाहा शि
मिदायत्वा वाताय स्वाहा ॥ १ ॥ इन्द्रायत्वा वसुमते रुद्रवते स्वाहेन्द्रायत्वादि

त्यवते स्वाहा ॥ इन्द्रायत्वाभिमातिघ्ने स्वाहा सवित्रेत्व ऋभुमते विभुमते वाज
वतेस्वाहा बृहस्पतयेत्वा विश्वदेव्यावते स्वाहा ॥ २ ॥ यमाय त्वाङ्गिरस्वते पितृ
मतेस्वाहा ॥ स्वाहा घर्माय स्वाहा घर्मःपित्रे ॥ ३ ॥ विश्वा आशा दक्षिणसत्स
र्वान्देवानयाळिह ॥ स्वाहा कृतस्य घर्मस्य मधोः पिबतमश्विना ॥ ४ ॥ दिवि
धाइमँय्यज्ञमिमँय्यज्ञन्दिद्विधाः॥स्वाहाग्नयेयज्ञियायशँय्यजुर्भ्यः॥५॥अश्विनाघर्मम्पा
तꣳ हार्द्दानमहर्दिवाभिरूतिभिः ॥ तन्त्रायिणे नमो द्यावापृथिवीभ्याम् ॥६॥ अ
पातामश्विना घर्ममनुद्यावापृथिवी अमꣳसाताम् ॥ इहैवरातयस्सन्तु ॥ ७ ॥ इ
षे पिन्वस्वोर्जे पिन्वस्व ब्रह्मणे पिन्वस्व क्षत्राय पिन्वस्व द्यावापृथिवीभ्याम्पिन्व
स्व ॥ धर्मासि सुधर्मामेन्यस्मे नृम्णानि धारय ब्रह्म धारय क्षत्रन्धारय विशन्धा
रय ॥ ८ ॥ २

स्वाहा पूष्णे शरसे स्वाहा ग्रावभ्यस्स्वाहा प्रतिरवेभ्यः ॥ स्वाहा पितृभ्य ऊ
र्ध्वबर्हिभ्यो घर्मपावभ्यस्स्वाहा द्यावापृथिवीभ्याꣳ स्वाहा विश्वेभ्यो देवेभ्यः ॥१॥
स्वाहा रुद्राय रुद्रहूतये स्वाहा सञ्ज्योतिषाज्योतिः ॥ अहः केतुनाजुषताꣳ सु
ज्योतिज्योतिषास्वाहारात्रिःकेतुनाजुषताꣳ सुज्योतिज्योतिषास्वाहा ॥ मधु हुत
मिन्द्रतमे अग्ना अश्यामते देवघर्म नमस्ते अस्तुमामा हिꣳसीः ॥ २ ॥ ३

अभीमम्महिमा दिवँविप्रो बभूव सप्रथाः ॥ उतश्रवसा पृथिवीꣳ सꣳसीद
स्वमहाँ२असि रोचस्वदेव वीतमः ॥ विधूममग्ने अरुषम्मियेध्य सृजप्रशस्त
दर्शतम् ॥ १ ॥ ४

यातेघर्म दिव्या शुग्या गायत्र्याꣳ हविर्धाने ॥ सात आप्यायतान्निष्ट्यायताम्
तान्तस्यै ते स्वाहा ॥ याते घर्मान्तरिक्षे शुग्या त्रिष्टुभ्याग्नीध्रे ॥ सात आप्याय

तान्निष्टर्यायतान्तस्यै ते स्वाहा ॥ याते घर्मपृथिव्याꣳ शुग्याजगत्याꣳ सदस्या ॥
सात आप्यायतान्निष्टर्यायतान्तस्यै ते स्वाहा ॥ १ ॥ क्षत्रस्यत्वा परस्पाय ब्रह्मण
स्तन्वम्पाहि ॥ विशस्त्वा धर्मणा वयमनुक्रामाम सुविताय नव्यसे ॥ २ ॥ चतु
स्त्रक्तिर्नाभिर्ऋतस्य सप्रथास्सनो विश्वायुस्सप्रथास्सनस्सर्वायुस्सप्रथाः ॥ अपद्वे
षोअपह्वरोऽन्यव्रतस्य सश्चिम ॥ ३ ॥ घर्मैतत्ते पुरीषन्तेन वर्धस्वचा चप्यायस्व॥
वर्धिषीमहिच वयमाचप्यासिषीमहि ॥ ४ ॥ अचिक्रदद्वृषा हरिर्महान्मित्रो नद
र्शतः ॥ सꣳसूर्येण दिद्युतदुदधिर्निधिः ॥ ५ ॥ सुमित्रियान आपओषधयस्सन्तु
दुर्मित्रियास्तस्मै सन्तु ॥ योऽस्मान्द्वेष्टि यञ्च वयन्द्विष्मः ॥ ६ ॥ उद्वयन्तमसस्प
रिस्वः पश्यन्त उत्तरम् ॥ देवन्देवत्रा सूर्यमगन्मज्योतिरुत्तमम् ॥ एधोऽस्येधिषी
महि समिदसि तेजोऽसि तेजो मयि धेहि ॥ ७ ॥ ५

यावती द्यावा पृथिवी यावच्च सप्त सिन्धवो वितस्थिरे ॥ तावन्तमिन्द्र ते
ग्रहमूर्ज्जा गृह्णाम्यक्षि तम्मयि गृह्णाम्यक्षितम् ॥ १ ॥ मयि त्यदिन्द्रियम्बृहन्म
यि दक्षोमयि क्रतुः ॥ घर्मस्त्रिशुग्विराजति विराजाज्योतिषा सह ब्रह्मणा तेज
सा सह ॥ पयसो रेत आभृतन्तस्य दोहमशीमह्युत्तरामुत्तराꣳ समाम् ॥ २ ॥ ६
त्विषस्सँव्वृक्क्रत्वे दक्षस्य ते सुषुम्णस्य ते सुषुम्णाग्निहुतः ॥ इन्द्र पीतस्य
प्रजापति भक्षितस्य मधुमत उपहूत उपहूतस्य भक्षयामि ॥ १ ॥ ७ ॥ हरिःॐ
देवस्य त्वा षट् ॥ ६ ॥ समुद्रायत्वाष्ट ॥ ८ ॥ स्वाहापूष्णेद्वे ॥ २ ॥ अ
भीममेका ॥ १ ॥ याते सप्त ॥ ७ ॥ यावती द्वे ॥ २ ॥ त्विषस्सँव्वृगेका ॥ १ ॥
सप्तानुवाकेषु सप्तविंशातिः ॥ २७ ॥ इति शुक्लयजुर्वेद काण्व संहितापाठे अष्टा
त्रिंशोऽध्यायः ॥ हरिःॐ ॥

हरिःॐ ॥ स्वाहा प्राणेभ्यस्साधिपतिकेभ्यः पृथिव्यै स्वाहाग्नये स्वाहान्तरि
क्षाय स्वाहा वायवे स्वाहा दिवे स्वाहा सूर्याय स्वाहा ॥ दिग्भ्यस्स्वाहा च
न्द्राय स्वाहा नक्षत्रेभ्यस्स्वाहाद्भ्यस्स्वाहा वरुणाय स्वाहा ॥ नाभ्यै स्वाहा पूता
यस्वाहा ॥ १ ॥ १

वाचे स्वाहा प्राणाय स्वाहा प्राणाय स्वाहा ॥ चक्षुषे स्वाहा च
क्षुषे स्वाहा श्रोत्राय स्वाहा श्रोत्राय स्वाहा ॥ १ ॥ मनसःकाममाकूतिंव्वाचस्स
त्यमशीय ॥ पशूनाꣳ रूपमन्नस्य रसो यशःश्रीःश्रयतांम्मयिस्वाहा ॥ २ ॥ २

प्रजापतिस्सम्भ्रियमाणस्सम्राट्सम्भृतो वैश्वदेवस्सꣳसन्नो घर्मःप्रवृक्तस्तेज
उद्यत आश्विनः पयस्यानीयमाने पूषा विष्यन्दमाने मारुतःक्वथन् ॥ मैत्रश्शर
सि सन्ताय्यमाने वायव्यो ह्रियमाण आग्नेयो हूयमानो वाग्घुतः ॥ १ ॥ ३ ॥

सविता प्रथमेऽहन्नग्निर्द्वितीये वायुस्तृतीय आदित्यश्चतुर्थे चन्द्रमाःपञ्चम
ऋतुःषष्ठे मरुतस्सप्तमे बृहस्पतिरष्टमे ॥ मित्रोनवमे वरुणो दशम इन्द्रएकादशे
विश्वेदेवा द्वादशे ॥ १ ॥ ४

उग्रश्चभीमश्चध्वान्तश्चधुनिश्च ॥ सासह्वाꣳश्चाभियुग्वाचविक्षिपस्स्वाहा ॥१॥५

अग्निꣳ हृदयेनाशनिꣳ हृदयाग्रेण पशुपतिङ्कृत्स्न हृदयेन भवँय्यक्ना ॥ श
र्वम्मतस्नाभ्या मीशानम्मन्युना महादेवमन्तः पर्शव्ये नोग्रन्देवँव्वनिष्ठना वसि
ष्ठ हनुश्शिङ्गीनि कोश्याभ्याम् ॥ १ ॥ ६

उग्रँल्लोहितेन मित्रꣳ सौव्रत्येन रुद्रन्दौर्व्रत्येनेन्द्रम्प्रक्रीळेन मरुतो बलेन सा
ध्यान्प्रमुदा ॥ भवस्य कण्ठयꣳ रुद्रस्यान्तःपार्श्वयम्महादेवस्ययकृच्छर्वस्य व
निष्ठः पशुपतेः पुरीतत् ॥ १ ॥ ७

लोमभ्यस्स्वाहा लोमभ्यस्स्वाहा त्वचे स्वाहा त्वचे स्वाहा लोहिताय स्वाहा
लोहिताय स्वाहा मेदसे स्वाहा मेदसे स्वाहा ॥ माꣳसेभ्यस्स्वाहा माꣳसेभ्य
स्स्वाहा स्नावभ्यस्स्वाहा स्नावभ्यस्स्वाहास्थभ्यस्स्वाहास्थभ्युस्स्वाहा मज्जभ्य
स्स्वाहा मज्जभ्यस्स्वाहा ॥ रेतसे स्वाहा पायवे स्वाहा ॥ १ ॥ ८

आयासाय स्वाहा प्रायासाय स्वाहा सँय्यासाय स्वाहा वियासाय स्वाहोद्या
साय स्वाहा ॥ शुचेस्वाहा शोचते स्वाहा शोकाय स्वाहा ॥ १ ॥ तपसे स्वाहा
तप्यमानाय स्वाहा तप्ताय स्वाहा ॥ निष्कृत्यै स्वाहा प्रायश्चित्यै स्वाहा भेष
जाय स्वाहा ॥ २ ॥ यमाय स्वाहान्तकाय स्वाहा मृत्यवेस्वाहा ॥ ब्रह्महत्यायै
स्वाहा विश्वेभ्यो देवेभ्यस्स्वाहा द्यावापृथिवीभ्याꣳस्वाहा ॥ ३ ॥ ९ हरिःॐ ॥

स्वाहाप्राणेभ्यएका ॥ १ ॥ वाचेद्वे ॥ २ ॥ प्रजापतिस्सम्भ्रियमाणः ॥ १ ॥ स
विता प्रथमे ॥ १ ॥ उग्रश्च ॥ १ ॥ अग्निꣳहृदयेन ॥ १ ॥ उग्रँल्लोहितेन ॥ १ ॥
लोमभ्यस्स्वाहाचेत्येकैका ॥१॥ आयासायतिस्रः ॥३॥ नवानुवाकेषुद्वादश ॥१२॥
इतिशुक्लयजुर्वेद काण्वसँहितापाठे एकोनचत्वारिंशोऽध्यायः ॥ हरिःॐ ॥

हरिःॐ ॥ ईशावास्यमिदꣳ सर्वय्यत्किञ्च जगत्याञ्जगत् ॥ तेन त्यक्तेन भु
ञ्जीथा मागृधःकस्य स्विद्धनम् ॥ १ ॥ कुर्वन्नेवेह कर्माणि जिजीविषे च्छतꣳ
समाः ॥ एवन्त्वयि नान्यथेतोऽस्ति न कर्म लिप्यतेनरे ॥ २ ॥ असुर्या नाम
ते लोका अन्धेन तमसा वृताः ॥ ताꣳस्ते प्रेत्याभिगच्छन्ति येके चात्महनो
जनाः ॥ ३ ॥ अनेजदेकम्मनसोजवीयो नैनद्देवा आप्नुवन्पूर्वमर्शत् ॥ तद्धा
वतोऽन्यानत्येति तिष्ठत्तस्मिन्नपो मातरिश्वा दधाति ॥ ४ ॥ तदेजति तन्नैज
ति तद्दूरे तद्वन्तिके ॥ तदन्तरस्य सर्वस्य तदुसर्वस्यास्य बाह्यतः ॥ ५ ॥ य

स्तु सर्वाणि भूतान्यात्मन्नेवानुपश्यति॥ सर्वभूतेषुचात्मानन्ततो नविजुगुप्सते॥६॥
यस्मिन्त्सर्वाणि भूतान्यात्मैवाभूद्विजानतः ॥ तत्रकोमोहःकश्शोक एकत्वमनुप
श्यतः॥७॥सपर्यगाच्छुक्रम कायमव्रणमस्नाविरꣳ शुद्ध मपापविद्धम् ॥कविर्मनीषी
परिभूस्स्वयम्भूर्याथातथ्यतोऽर्थान्व्यदधाच्छाश्वतीभ्यस्समाभ्यः ॥ ८ ॥ अन्धन्तमः
प्रविशन्ति ये विद्यामुपासते ॥ ततो भूय इवते तमोय उविद्यायाꣳ रताः ॥ ९॥
अन्यदेवाहुर्विद्ययान्यदाहुरविद्यया ॥ इति शुश्रुम धीराणाँय्येनस्तद्विचचक्षि
रे ॥ १० ॥ विद्याञ्चाविद्याञ्चयस्तद्वेदो भयꣳ सह ॥ अविद्यया मृत्युन्तीर्त्वा वि
द्ययामृतमश्नुते ॥ ११ ॥ अन्धन्तमःप्रविशन्ति ये सम्भूतिमुपासते ॥ ततोभूय
इवते तमोय उसम्भूत्याꣳ रताः ॥ १२ ॥ अन्यदेवा हुस्सम्भवादन्यदाहुरसम्भ
वात् ॥ इतिशुश्रुम धीराणाँय्येनस्तद्विचचक्षिरे ॥ १३ ॥ सम्भूतिञ्च विनाशञ्च

॥ इति तृतीयोदशकःसमाप्तः ॥